८. अधोलिखितशब्दानां विभक्तिं वचनं च लिखत-

| | | विभक्तिः | वचनम् |
|---|---|---|---|
| क. | पितॄन् | .................. | ................. |
| ख. | मन्त्रिणः | .................. | ................. |
| ग. | बहुभिः | .................. | ................. |
| घ. | वार्तायाम् | .................. | ................. |

9. अधोलिखितपङ्क्तीनां पादपूर्तिं कुरुत-

क. कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयम्।

ख. पण्डितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं महत्।

ग. सम्प्राप्तकालं दातव्यं ददासि न विलम्वसे।

घ. आयस्ते विपुलः कच्चित् कच्चिदल्पतरो व्ययः।

10. अधोलिखितान् अव्ययान् आधृत्य वाक्यनिर्माणं कुरुत-

| | | | | | |
|---|---|---|---|---|---|
| (क) | न | (ख) | सह | (ग) | क्षिप्रम् |
| (घ) | हि | (ङ) | च | (च) | यथा |

योग्यताविस्तारः-

- राजधर्मविषयकाः श्लोकाः अन्येभ्यः ग्रन्थेभ्यः चित्वा लेखनीयाः।
- पुरा उज्जयिन्यां विक्रमो नाम राजा बभूव। तस्य राजधर्मवैशिष्ट्यम् आचार्येभ्यः ज्ञात्वा उत्तरपुस्तिकायाम् लिखत।

❖ ❖ ❖

एकादशः पाठः

# राष्ट्राय चिन्तनम्

आचार्यविष्णुगुप्तः चाणक्यस्य अपरं नाम। सः चन्द्रगुप्तस्य अमात्यः। चाणक्यः सर्वदा देशहिताय एव चिन्तयति तदर्थमेव प्रयत्नं करोति स्म। स राष्ट्रस्य कृते समाजस्य कृते चन्द्रगुप्तस्य आदेशस्य उल्लङ्घनम् अपि कर्तुम् उत्सहते स्म। देशस्य कृते एव प्रजाधनस्य सदुपयोगः स्यात् इति शिक्षयति एषः नाट्यांशः। एषः अंशः 'मुद्राराक्षसम्' इति संस्कृतनाटकात् सङ्कलितः। मुद्राराक्षसस्य लेखकः विशाखदत्तः अस्ति।

(स्थानम्-कुसुमपुरे चन्द्रगुप्तस्य प्रासादः)

(कञ्चुकी प्रविशति)

कञ्चुकी - (परिक्रम्य, आकाशम् उद्वीक्ष्य) भोः भोः प्रासादाधिकृताः पुरुषाः! देवः चन्द्रगुप्तः वः विज्ञापयति-कौमुदीमहोत्सव-कारणतः अतिरमणीयं कुसुमपुरम् अवलोकयितुम् इच्छामि इति। अतः सुगाङ्ग-प्रासादस्य उपरि स्थिताः प्रदेशाः संस्क्रियन्ताम्।

(पुनः आकाशे) किं ब्रूथ ? कौमुदी-महोत्सवः प्रतिषिद्धः ? आः किम् एतेन वः प्राणहरेण कथाप्रसङ्गे न ? यथा आदिष्टं, चन्दनवारिणा भूमिं शीघ्रं सिञ्चन्तु। पुष्पमालाभिः स्तम्भान् अलङ्कुर्वन्तु। किं ब्रूथ ? आर्य ! इदम् अनुष्ठीयते देवस्य शासनम् इति। भद्राः ! त्वरध्वम्, त्वरध्वम्। अयमागतः एव देवः चन्द्रगुप्तः। (नेपथ्ये) इत इतो देवः।

(ततः प्रविशति राजा प्रतिहारी च)

राजा - (स्वगतम्) अहो ! राज्यं हि नाम धर्मवृत्तिपरकस्य नृपस्य कृते महत् कष्टदायकम्। दुराराध्या हि राजलक्ष्मीः। (प्रकाशम्) आर्य वैहीनरे ! सुगाङ्गमार्गम् आदेशय।

कञ्चुकी - इत इतो देवः। (नाट्येन परिक्रम्य) अयं प्रासादः। शनैः आरोहतु देवः।

राजा - (नाट्येन आरुह्य) आर्य ! अथ अस्यमद्वचनात् आघोषितः कुसुमपुरे कौमुदीमहोत्सवः ?

कञ्चुकी - अथ किम् !

राजा - तत्कथं कौमुदीमहोत्सवः न प्रारब्धः ?

कञ्चुकी - एवम् एतत्।

राजा - किम् एतत् ?

कञ्चुकी - देव ! एतत् इदम्।

राजा - स्पष्टं कथय।

कञ्चुकी - अथ प्रतिषिद्धः कौमुदीमहोत्सवः।

राजा - (सक्रोधम्) आः केन ?

कञ्चुकी - देव ! न अतः परं विज्ञापयितुं शक्यम्।

राजा - न खलु आर्यचाणक्येन अपहृतः प्रेक्षकाणाम् अतिशयरमणीयः चक्षुषो विषयः ?

कञ्चुकी - देव ! कः अन्यः जीवितुकामो देवस्य शासनम् अतिवर्तेत ?

राजा - (नाट्येन उपविश्य) आर्य ! आचार्यचाणक्यं द्रष्टुम् इच्छामि।

कञ्चुकी - यथा आज्ञापयति देवः। (इति निष्क्रान्तः)

(ततः प्रविशति आसनस्थः स्वभवनगतः चिन्तां नाटयन् चाणक्यः)

चाणक्यः - (आकाशे लक्ष्यं बद्ध्वा) कथं स्पर्धते मया सह दुरात्मा राक्षसः ? राक्षस ! राक्षस ! विरम विरम अस्माद् दुर्व्यसनात्।

कञ्चुकी - (प्रविश्य) (परिक्रम्य अवलोक्य च) इदम् आर्यचाणक्यस्य गृहम्। अहो राजाधिराजमन्त्रिणो विभूतिः। तथाहि गोमयानाम् उपलभेदकम् एतत् प्रस्तरखण्डम्, इतः शिष्यैः आनीतानां दर्भाणां स्तूपः अत्र शुष्यमाणैः समिद्भिः अतिनमितः छदिप्रान्तः, जीर्णाः भित्तयः। अतएव निस्पृहत्यागिभिः एतादृशैः जनैः राजा तृणवद् गण्यते। (भूमौ निपत्य) जयतु आर्यः।

चाणक्यः - वैहीनरे ! किम् आगमन-प्रयोजनम् ?

कञ्चुकी - आर्य ! देवः चन्द्रगुप्तः आर्यं शिरसा प्रणम्य विज्ञापयति-यदि कार्ये बाधा न स्यात् तर्हि आर्यं द्रष्टुम् इच्छामि।

चाणक्यः - एवम् ! वृषलः मां द्रष्टुम् इच्छति। वैहीनरे ! किं ज्ञातः कौमुदीमहोत्सव-प्रतिषेधः ?

कञ्चुकी - अथ किम् !

चाणक्यः - केन कथितम् ?

कञ्चुकी - स्वयमेव देवेन अवलोकितम्।

चाणक्य - आः ज्ञातम् ! भवद्भिः एव प्रोत्साह्य कोपितः वृषलः। किम् अन्यत् ?

कञ्चुकी - (भयं नाटयन्) आर्य, देवेन एव अहम् आर्यस्य चरणयोः प्रेषितः।

चाणक्यः - कुत्र वर्तते वृषलः ?

कञ्चुकी - सुगाङ्गप्रासादे।

चाणक्य - सुगाङ्गप्रासादस्य मार्गम् आदेशय।

कञ्चुकी - इत: इत: आर्य !

(उभौ परिक्रामत:)

कञ्चुकी - एष सुगाङ्गप्रासाद: ।

चाणक्य - (नाट्येन आरुह्य अवलोक्य च) अये सिंहासनम् अध्यास्ते वृषल: ।

(उपसृत्य) विजयताम् वृषल: ।

राजा - (आसनाद् उत्थाय) आर्य ! चन्द्रगुप्त: प्रणमति ।

(इति पादयो: पतति)

चाणक्य: - (पाणौ गृहीत्वा) उत्तिष्ठ, उत्तिष्ठ, वत्स ! विजयताम् ।

राजा - आर्यप्रसादात् अनुभूयत एव सर्वम् । तदुपविशतु आर्य: ।

चाणक्य: - वृषल ! किमर्थं वयम् आहूता: ?

राजा - आर्यस्य दर्शनेन आत्मानम् अनुग्रहीतुम् ।

चाणक्य: - अलम् अनेन विनयेन । न निष्प्रयोजनं प्रभुभि: आहूयन्ते अधिकारिण: ।

राजा - आर्य ! कौमुदीमहोत्सवस्य प्रतिषेधे किं फलम् आर्य: पश्यति ?

चाणक्य: - (स्मितं कृत्वा) उपालब्धुं तर्हि वयम् आहूता: ।

राजा - शान्तं पापं, शान्तं पापम् । नहि, नहि, विज्ञापयितुम् ।

चाणक्य: - यदि एवं तर्हि शिष्येण गुरो: आज्ञा पालनीया ।

राजा - एवम् एतत् । क: सन्देह: ? किन्तु न कदाचित् आर्यस्य निष्प्रयोजना प्रवृत्ति: । अत: पृच्छ्यते ।

चाणक्य: - न प्रयोजनम् अन्तरा चाणक्य: स्वप्नेऽपि चेष्टते ।

राजा - अत एव श्रोतुम् इच्छामि ।

(नेपथ्ये वैतालिकौ काव्यपाठं कुरुत:)

राजा - आर्य वैहीनरे ! आभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रं दापय ।

चाणक्य: - (सक्रोधम्) वैहीनरे ! तिष्ठ तिष्ठ । न गन्तव्यम् । वृषल ! किम् अस्थाने महान् प्रजा-धनापव्यय: ?

राजा - (सक्रोधम्) आर्येण एव सर्वत्र निरुद्धचेष्टस्य मे बन्धनम् इव राज्यं, न राज्यम् इव ।

चाणक्य: - वृषल ! स्वयम् अनभियुक्तानां राज्ञाम् एते दोषा: सम्भवन्ति ।

राजा- यद्येवं तर्हि कौमुदीमहोत्सव-प्रतिषेधस्य तावत् प्रयोजनं श्रोतुमिच्छामि ।

चाणक्यः - कौमुदीमहोत्सवस्य आयोजनस्य प्रयोजनं ज्ञातुमिच्छामि।

राजा - प्रथमं मम आज्ञायाः पालनम्।

चाणक्यः - प्रथमं ममापि तव आज्ञायाः उल्लङ्घनम् एव। अथ अपरम् अपि प्रयोजनं श्रोतुमिच्छसि तदपि कथयामि।

राजा - कथ्यताम्।

चाणक्यः - वत्स! श्रूयताम् अवधार्यताम् च। पितृवधात् क्रुद्धः राक्षसोपदेशप्रवणः महीयसा म्लेच्छबलेन परिवृतः वर्तते। पुत्रः मलयकेतुः अस्मान् अभियोक्तुम् उद्यतः। सोऽयं व्यायामकालो, न उत्सवकालः इति। अतः इदानीं दुर्ग-संस्कारः प्रारब्धव्यः। अस्मिन् समये किं कौमुदी-महोत्सवेन इति प्रतिषिद्धः। राष्ट्रचिन्ता ननु गरीयसी। प्रथमं राष्ट्रसंरक्षणम् ततः उत्सवाः इति।

**(पटाक्षेपः)**

## शब्दार्थः

परिक्रम्य - परिक्रमां कृत्वा। उद्वीक्ष्य - उपरि दृष्ट्वा। अधिकृताः - कर्मचारिणः। वः - युष्मभ्यम्। अवलोकयितुम् - द्रष्टुम्। संस्क्रियन्ताम् - अलङ्क्रियन्ताम्। कौमुदीमहोत्सवः - शरत्पूर्णिमायाम् आयोजितः उत्सवः। प्रतिषिद्धः - निषिद्धः। अनुष्ठीयते - सम्पाद्यते। त्वरध्वम् - शीघ्रतां कुरुत। दुराराध्या - कष्टैः उपास्या। अपहृतः - नाशितः, दूरीकृतः। प्रेषकाणाम् - दर्शकानाम्। अतिवर्तेत - उल्लङ्घनं कुर्यात्। गोमयानाम्-गोः पुरीषम् इति गो मयट् तेषाम् (गोबर के उपलों के)। भेदकम् - त्रोटकम्। स्तूपम् - समूहः। वृषलः - राजसु श्रेष्ठः। प्रोत्साह्य - उत्तेजकवचनैः उद्दीप्य। अध्यास्ते - उपविशति। प्रभुभिः - स्वामिभिः। विज्ञापयितुम् - निवेदयितुम्। अस्थाने - अनुचिते अवसरे। निरुद्धचेष्टस्य - अवरुद्धा गतिः यस्य तस्य। अनभियुक्तानाम् - स्वतन्त्रतायाः अवलम्बनं न कुर्वतां (राज्ञाम्)। अवधार्यताम् - ध्यानेन श्रूयताम्। राक्षसोपदेशप्रवणः - राक्षसस्य उपदेशश्रवणे तत्परः। अभियोक्तुम् - आक्रमितुम्। दुर्गसंस्कारः - सेनासङ्ग्रह-दुर्गपरिष्करण-संस्कारादि-रूपस्य व्यापारः।

## अभ्यासः

1. एकपदेन उत्तरं लिखत-

क. चाणक्यः कं 'वृषल' इति सम्बोधयति ?

ख. वैहीनरिः कस्य नाम आसीत् ?

ग. कस्य संस्कारः अपेक्षितः आसीत् ?

घ. कौमुदीमहोत्सवः कुत्र आघोषितः ?

ङ. वृषलः कुत्र स्थितः आसीत् ?

च. चाणक्येन सह कः स्पर्धते ?

2. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिख्यन्ताम्-

क. कौमुदीमहोत्सवः कस्य आज्ञया आघोषितः आसीत् ?

ख. कः चन्द्रगुप्तस्य राज्यम् आक्रान्तुम् उद्यतः भवति ?

ग. मलयकेतुः किमर्थं क्रुद्धः आसीत् ?

घ. चाणक्यस्य मतानुसारं कस्य चिन्ता गरीयसी ?

ङ. चाणक्यस्य गृहम् कीदृशम् ?

3. रिक्तस्थानानि पूरयत-

क. ......................... हि राजलक्ष्मीः।

ख. अथ ..................... कौमुदीमहोत्सवः।

ग. आर्यस्य .................... आत्मानम् अनुग्रहीतुम्।

घ. अये ................... अध्यास्ते वृषलः।

ङ. यदि एवं तर्हि शिष्येण .................... आज्ञा पालनीया।

4. अधोलिखितानां पदानां यथोचितं सन्धिं सन्धिविच्छेदं वा कृत्वा सन्धेः नाम लिखत-

| | शब्दः | सन्धिविच्छेदः | सन्धेः नाम |
|---|---|---|---|
| क. | दुराराध्या | .................. | .................. |
| ख. | ............. | अधि + आस्ते | .................. |
| ग. | प्रासादाधिकृता | .................. | .................. |
| घ. | धनापव्ययः | .................. | .................. |
| ङ. | .............. | निः + प्रयोजनम् | .................. |
| च. | महोत्सवः | .................. | .................. |

5. पाठात् चित्वा विग्रहपदानां स्थाने समस्तपदानि समस्तपदानां स्थाने च विग्रहान् समासनामनिर्देशपूर्वकं लिखत-

| | | विग्रहः/समस्त पद | समासनाम |
|---|---|---|---|
| क. | देवस्य शासनम् | .................. | .................. |
| ख. | जीवितुकामः | .................. | .................. |
| ग. | अस्थाने | .................. | .................. |
| घ. | दुर्गस्य संस्कारः | .................. | .................. |
| ङ. | अनभियुक्तानाम् | .................. | .................. |
| च. | राष्ट्रचिन्ता | .................. | .................. |

6. अधोलिखितानां पदानां मूलशब्दं विभक्तिं वचनं लिङ्गं च लिखत-

| | पदानि | मूलशब्दः | विभक्तिः | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| क. | प्रभुभिः | ......... | .......... | ......... | ......... |
| ख. | स्तूपम् | ......... | .......... | ......... | ......... |
| ग. | प्रेषकाणाम् | ......... | .......... | ......... | ......... |
| घ. | भवद्भिः | ......... | .......... | ......... | ......... |
| ङ. | मया | ......... | .......... | ......... | ......... |

7. अधोलिखितानां क्रियापदानां धातुं वचनं पुरुषं च लिखत-

| | क्रियापदानि | धातुः | पुरुषः | वचनम् |
|---|---|---|---|---|
| क. | विज्ञापयति | .......... | ......... | ......... |
| ख. | जयतु | .......... | ......... | ......... |
| ग. | इच्छामि | .......... | ......... | ......... |
| घ. | सिञ्चन्तु | .......... | ......... | ......... |
| ङ. | प्रणमति | .......... | ......... | ......... |
| च. | उपविशतु | .......... | ......... | ......... |

8. अधोलिखितेषु पदेषु प्रकृतिप्रत्ययवियोजनं संयोजनं वा कुरुत-

| | | | |
|---|---|---|---|
| क. | श्रोतुम् | = | |
| ख. | अभि+युज्+णिच्+तुमुन् | = | |
| ग. | अव+लोक+तुमुन् | = | |
| घ. | द्रष्टुम् | = | |
| ङ. | वि+ज्ञा+णिच्+तुमुन् | = | |
| च. | अनु + .......... + तुमुन् | = | अनुग्रहीतुम् |
| छ. | उप + आ + ........+ तुमुन् | = | उपालब्धुम् |

9. अधोलिखिताः पङ्क्तीः कः कं प्रति कथयति ?

| | पङ्क्तिः | कः | कम् |
|---|---|---|---|
| क. | किम् अस्थाने महान् प्रजाधनापव्ययः। | .......... | .......... |
| ख. | शान्तं पापं शान्तं पापम्। | .......... | .......... |
| ग. | नहि नहि विज्ञापयितुम्। | .......... | .......... |
| घ. | चन्दनवारिणा भूमिं सिञ्चन्तु। | .......... | .......... |

ङ.  आर्य ! इदम् अनुष्ठीयते देवस्य अनुशासनम्।  ..........  ..........

च.  इत इतो देवः।  ..........  ..........

10. शुद्धकथनानां समक्षम् ''आम्'', अशुद्धकथनानां समक्षं ''न'' इति लिखत-

क.  चाणक्यस्य गृहस्य भित्तयः जीर्णाः आसन्।

ख.  चाणक्यः स्वाभिमानी आसीत्।

ग.  चाणक्यस्य गृहे राजाधिराजमन्त्रिकृते यथोचिताः विभूतयः आसन्।

घ.  चन्द्रगुप्तः चाणक्यस्य शिष्यः न आसीत्।

ङ.  राक्षसः चाणक्येन सह स्पर्द्धाम् कर्तुम् इच्छति स्म।

## योग्यताविस्तारः -

- राष्ट्रभक्तिविषये सुभाषितानि सूक्तीः च विलिख्य कक्षायां प्रदर्शयतु।

❖ ❖ ❖

## द्वादश: पाठ:

# कर्त्तव्यपरायण:

*संस्कृते गद्यसाहित्यस्य वैशिष्ट्यम् अस्ति। वेदकालत: समारभ्य वर्तमानपर्यन्तं गद्यस्य प्रयोग: प्रचुररूपेण दृश्यते। गद्यमेव कवीनाम् निकषम्-''गद्यं कवीनां निकषं वदन्ति'' इति कथितम्। एकोनविंशशतके पण्डितअम्बिकादत्तव्यासेन संस्कृतगद्यकाराणाम् प्रतिनिधित्वम् कृतम्। तेन स्वकीये ''शिवराजविजय''इति ग्रन्थे इतिहासप्रधान वीरशिवराजस्य वर्णनं कृतं। प्रस्तुतोऽयम् गद्यांश: शिवराजविजयात् एव उद्धृतोऽस्ति। गद्येऽस्मिन् कर्त्तव्यपरायणदौवारिकस्य वर्णनमस्ति। निदर्शनीयोऽयम् अंश:।*

तत: संवृत्ते किञ्चिदन्धकारे धूप-धूमेनेव व्याप्तासु हरित्सु, भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाण:, आगत-प्रत्यागतञ्च विदधान:, प्रताप-दुर्ग-दौवारिक:, कस्यापि पादक्षेप-ध्वनिमिव अश्रौषीत्। तत: स्थिरीभूय पुरत: पश्यन् सत्यपि दीप-प्रकाशे अवतमसवशात् आगन्तारं कमपि अनवलोकयन्, गम्भीरस्वरेण एवमवादीत्-

'कोऽत्र भो: ? क: कोऽत्र भो: ?' इति।

अथ क्षणानन्तरं पुन: स एव पादध्वनि: अश्रावि, इति भूय: साक्षेपमवोचत्-'क एष मामनुत्तरयन् मुमूर्षु: समायाति बधिर:' ? तत:-'दौवारिक: ! शान्तो भव, किमिति व्यर्थं मुमूर्षु: इति, बधिर इति च वदसि ?' इति वक्तारमपश्यता एव आकर्णि मन्दस्वरमेदुरा वाणी। अथ 'तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्याणामादेशो यत् दौवारिकेण प्रहरिणा वा त्रि: पृष्टोऽपि प्रत्युत्तरम् अददद् हन्तव्य इति ?' इत्येवं भाषमाणेन द्वा:स्थेन, 'क्षम्यतामेष आगच्छामि आगत्य च निखिलं निवेदयामि' इति कथयन् द्वादशवर्षेण केनापि भिक्षुवटुना अनुगम्यमान:, कोऽपि काषायवास:, धृत-तुम्बी-पात्र:, भस्म-च्छुरित-ललाट:, रुद्राक्ष-मालिकासनाथित-कण्ठ:, भव्यमूर्ति: सन्न्यासी दृष्ट:। ततस्तयोरेवमभूदालाप: -

सन्न्यासी - कथमस्मान् सन्न्यासिनोऽपि कठोरभाषणै: तिरस्करोषि ?

दौवारिक: - भगवन् ! भवान् सन्न्यासी, तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लंघ्य निजपरिचयमददद् एव आयातीत्याक्रुश्यते।

सन्न्यासी - सत्यं क्षान्तोऽयमपराध:; परमद्यावधि सन्न्यासिन:, ब्रह्मचारिण:, पण्डिता:, स्त्रिय:, बालाश्च न किमपि प्रष्टव्या:, आत्मनमपरिचायन्तोऽपि च प्रवेष्टव्या:।

दौवारिकः - सन्यासिन्, सन्यासनि् ! ! बहूक्तम्, विरम, न वयं दौवारिकाः ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे। किन्तु यो वैदिक-धर्मरक्षा-व्रती, यश्च सन्न्यासिनां, ब्रह्मचारिणां, तपस्विनाञ्च सन्न्यासस्य, ब्रह्मचर्यस्य, तपसश्च अन्तरायाणां हन्ता, येन च वीरप्रसविनी इयमुच्यते कोङ्कणदेशभूमिः; तस्यैव महाराजशिववीरस्य आज्ञां वयं शिरसा वहामः।

सन्न्यासी - अथ किमप्यस्तु, पन्थानं निर्दिश। आवां शिववीरनिकटे जिगमिषावः।

दौवारिकः - अलमालप्यापि तत्। प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ।

सन्न्यासी - तत् किं कोऽपि न प्रविशति रात्रौ ?

दौवारिकः - (साक्षेपं) कोऽपि कथं न प्रविशति ? परिचिता वा प्राप्त-परिचय-पत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः, ये तुम्बीं गृहीत्वा द्वाराद् द्वारम्-इति कथयन्नेव तत्तेजसेव धर्षितः मध्ये एव विरराम।

सन्न्यासी - (स्वगतम्) राजनीतिनिष्णातः शिववीरः। सर्वथा दौवारिकतायोग्य एवायं द्वारपालः स्थापितोऽस्ति। परीक्षितमपि एनमनेकस्मिन् विषये पुनः परीक्षिष्ये तावत्। (प्रकटम्) दौवारिक ! इत आयाहि, किमपि कर्णे कथयिष्यामि।

दौवारिकः - (तथा कृत्वा) कथ्यताम्।

सन्न्यासी - निरीक्षस्व, त्वमधुना दौवारिकोऽसि, प्राणान् अगणयन् जीविकां निर्वहसि। त्वं सहस्रं वा अयुतं वा मुद्राः राशीकृताः कदापि प्राप्स्यसीति न कथमपि सम्भाव्यते।

दौवारिकः - आम्, अग्रे कथ्यताम्।

सन्न्यासी - वयञ्च सन्न्यासिनः वनेषु गिरिकन्दरेषु च विचरामः, सर्वं रसायन-तत्त्वं विद्मः।

दौवारिकः - स्यादेवम्, अग्रे, अग्रे ?

सन्न्यासी - तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः तद् अधुनैव परिष्कृतं पारद-भस्म तुभ्यं दद्याम्, यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत् संख्यापक-तुलापरिमितं ताम्रं जाम्बूनदं विधातुं शक्नुयाः।

दौवारिकः - हंहो ! कपट-सन्न्यासिन् ! कथं विश्वासघातं स्वामिवञ्चनञ्च शिक्षयसि ? ते केचन अन्ये भवन्ति जार-जाताः ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति। न वयं शिवगणाः तादृशाः। (सन्न्यासिनः हस्तं धृत्वा) इतस्तु सत्यं कथय, कस्त्वम् ? कुत आयातः ? केन वा प्रेषितः ?

सन्न्यासी - (स्मित्वेव) अथ त्वं मां कं मन्यसे ?

दौवारिकः - अहन्तु त्वामस्यैव ससेनस्यायातस्य अपजलखानस्य....

सन्न्यासी - (निवार्य मध्य एव) धिक् ! धिक् !!

दौवारिकः - कस्यापि अन्यस्य वा गूढचरं मन्ये। तदादेशं पालयिष्यामि प्रभुवर्यस्य। (हस्तमाकृष्य) आगच्छ दुर्गाध्यक्ष-समीपे, स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति।

ततः सन्न्यासी तु-'त्यज, नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि, दयस्व, दयस्व'-इति सहस्रधा समचकथत्। तथापि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः।

अथ यावद् द्वारस्थस्तम्भोपरि संस्थापितायां काच-मञ्जूषायां जाज्वल्यमानस्य प्रबलप्रकाशस्य दीपस्य समीपे समायातः तावत् सन्न्यासिना उक्तम्-'दौवारिक ! अपि मां पूर्वमपि कदाप्यद्राक्षीः ?' ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणः मन्द्रेण स्वरेण, अरुणापाङ्गाभ्यां लोचनाभ्यां, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्यचिनोत्। भुशुण्डी-समुत्तोलन-किण-कर्कश-करग्रहमपहाय, सलज्ज इव च नम्रीभूय प्रणमन् उवाच-'आः ! कथं श्रीमान् गौरसिंहः आर्यः ? क्षम्यतामनुचितः व्यवहारः एतस्य ग्राम्यवराकस्य।' तदवधार्य तस्य पृष्ठे हस्तं विन्यसन् सन्न्यासिरूपो गौरसिंहः समवोचत्-'दौवारिक ! मया बहुशः परीक्षितोऽसि। ज्ञातोऽसि, यथायोग्य एव पदे नियुक्तोऽसि चेति। त्वादृशा एव प्रभुवर्याणां पुरस्कारभाजनानि भवन्ति, लोकद्वयञ्च विजयन्ते। तव प्रामाणिकतां जानीत एव अत्र भवान् प्रभुवर्यः, परमहमपि विशिष्य कीर्तयिष्यामि।'

## शब्दार्थः

हरित्सु - दिक्षु। भूशुण्डीम् - आयुधविशेषम् (बन्दूक)। आगतप्रत्यागतम् - यातायातम्। विदधानः - कुर्वाणः। प्रतापदुर्गस्य - तन्नाम्ना ख्यातदुर्गस्य (किला)। दौवारिकः - द्वारपालः। पादक्षेप-ध्वनिम् - चरणचङ्क्रमणशब्दम्। अवतमसम् - क्षीणध्वान्तम्। वशात् - सामर्थ्यात्। मन्द्रस्वरेण - गम्भीरस्वरेण। मेदुरा - सान्द्रस्निग्धा। आकर्णि - श्रुतः। अज्ञायि - ज्ञातः। प्रहरिणा - यामिकेन। त्रिः - वारत्रयम्। सनाथितः - भूषितः, कण्ठो यस्य सः। आलापः - अन्योन्यसम्बोधनपूर्वकभाषणम्। तुरीयाश्रमसेवी - चतुर्थाश्रमवासी। अददन् - अयच्छन्। अपरिचाययन्तः- परिचयमददतः। शिरसा वहामः - सर्वथा पालयामः। अन्तरायाणाम् - विघ्नानाम्। हन्ता - निवारयिता। अलमालव्यापि - इदमालपनीयमपि नास्तीत्यर्थः। प्राह्णे - पूर्वाह्णे। तुम्बीम् - अलाबूपात्रम्। धर्षितः - भीषितः। निष्णातः - निपुणः। दौवारिकता - द्वारपालकर्म। परीक्षिष्ये - परीक्षां करिष्ये। निरीक्षस्व - अवलोकय। त्वम् - निस्स्वः। तत्त्वम् - सामर्थ्यम्। प्रतिरुन्धेः - प्रतिवारयेः। परिष्कृतम् - सुसाधितम्। तुला - पलानां शतम्। जाम्बूनदम् - सुवर्णम्। जारजाताः - "अमृते जारजः कुण्डो मृते भर्तरि गोलकः" इति शास्त्रेण पत्यौ जीवति परपुरुषेण समुत्पादिता, जारजाता इत्युच्यन्ते, अत्र निन्दार्थकम्। (उत्कोचो हिन्द्यां "घूस" इति "रिश्वत" इति चोच्यते।) काचमञ्जूषा - रक्तवर्तिका (लालटेन)। आपाङ्गः - नेत्रप्रान्तभागः। चुम्बितम् - स्पृष्टम्। यौवनम् - नवं वयो येन तेन। निर्भीकेण - भयशून्येन। हारिणा - मनोहरेण। पर्यचिनोत् - परिचितवान्। भृशुण्डया - आयुधविशेषस्य। समुत्तोलनेन - उत्थापनेन। यः किणः - चिह्नविशेषः। तेन कर्कशस्य - कठोरस्य करस्य। ग्रहः - ग्रहणम्।

## अभ्यासः

1. अधोलिखितप्रश्नानाम् एकपदेन उत्तराणि लिखत-

क. दुर्गदौवारिकः किम् अश्रौषीत् ?

ख. संन्यासी केन अनुगम्यमानः आसीत् ?

ग. कं तुरीयाश्रमसेवीति कथ्यते ?

घ. संन्यासी उत्कोचरूपेण किं दातुमिच्छति ?

ङ. संन्यासिवेषेण कः आगतः ?

च. एषः पाठः कुतः गृहीतः अस्ति ?

2. अधोलिखितप्रश्नानाम् एकवाक्येन उत्तराणि ददातु-

क. दौवारिकः संन्यासीं प्रति किमर्थं क्रुध्यति ?

ख. संन्यासिनः राजप्रासादे कदा प्रवेशसमयो भवति ?

ग. रात्रौ राजभवने के प्रवेशितुम् अर्हन्ति ?

घ. जारजाताः कथम् आत्मानम् अन्धतमसे पातयन्ति ?

ङ. के प्रभुवर्याणां पुरुस्कारभाजनानि भवन्ति ?

3. अधोलिखितप्रश्नानाम् उत्तराणि दीयन्ताम्-

क. के जनाः राजभवने प्रष्टव्याः न भवन्ति ?

ख. शिववीरे के गुणाः आसन् ?

ग. गौरसिंहेन दौवारिकः कथं परीक्षितः ?

घ. दौवारिके के गुणाः भवेयुः ?

4. अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत-

क. सत्यं ................. अयम् अपराधः।

ख. .................... तमाकृष्य नयन्नेव प्रचलितः।

ग. न वयं दौवारिकाः .................. प्रतीक्षामहे।

घ. .................. आज्ञां वयं शिरसा वहामः।

ङ. राजनीतिनिष्णातः .................... ।

5. अधोलिखितकथनानाम् उचितमेलनं कुरुत-

| | (क) | | (ख) |
|---|---|---|---|
| क. | प्राणान् अगणयन् | क. | एतस्य ग्राम्यवराकस्य। |
| ख. | क्षम्यतामेष आगच्छामि | ख. | अत्र भवान् प्रभुवर्यः। |
| ग. | क्षम्यतामनुचितः व्यवहारः | ग. | नाहं पुनरेवं कथिष्यामि। |
| घ. | नाहं पुनरायास्यामि | घ. | आगत्य च निखिलं निवेदयामि। |
| ङ. | तवप्रामाणिकतां जानीत एव | ङ. | जीविकां निवर्हसि। |

6. अधोलिखितशब्दानां सन्धिविच्छेदं कुरुत-

क. धूमेनैव

ख. केनापि

ग. पृष्टोऽपि

घ. बहूक्तम्

ङ. इत्येवम्

च. कोऽत्र

7. अधोलिखितशब्दानां समास-विग्रहं कुरुत-

क. पादध्वनिः

ख. प्रभुवर्यः

ग. वीरप्रसविनी

घ. महाराजः

ङ. द्वारपालः

च. प्रवेशसमयः

8. अधोलिखितशब्दानां प्रकृतिः प्रत्ययः च पृथक्-पृथक् कुरुत-

क. निधाय

ख. पुरतः

ग. गम्यमानः

घ. हन्तव्यः

ङ. दौवारिकः

9. अधोलिखितवाक्यानि कः कम् प्रति कथयति-

क. कः कोऽत्र भोः ?

ख. क्षम्यतामेष आगच्छामि ।

ग. आवाम् शिववीरनिकटे जिगमिषावः ।

घ. वयं सर्वं रसायन तत्त्वं विद्मः ।

ङ. न वयं शिवगणाः तादृशाः ।

10. अधोलिखितशब्देषु विशेषण-विशेष्यं पृथक्-पृथक् कुरुत-

क. भव्यमूर्तिम्

ख. भिक्षुवटुना

ग. कषायवासाः

घ. गम्भीरस्वरः

ङ. कठोरभाषणैः

योग्यताविस्तारः-

- पात्रघटनानुसारम् तम्-तम् भावं प्रदर्शयन्तः अभिनयं कुरुत ।

❖ ❖ ❖

## त्रयोदश: पाठ:

# गोभक्तदिलीप:



महाकवि: कालिदास: भारतीयसंस्कृते: प्रतिनिधि: कविरस्ति। विश्वस्य सर्वश्रेष्ठ: कविरिति वक्तुं शक्नुम:। तस्य साहित्यमपि विश्वप्रसिद्धमेव। मालविकाग्निमित्रं विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलं नाट्यग्रन्था:, ऋतुसंहारं, मेघदूतं, कुमारसम्भवं, रघुवंशमहाकाव्यं काव्यग्रन्था: तस्य प्रसिद्धा:। पाठेऽस्मिन् कालिदासस्य श्रेष्ठकाव्यात् रघुवंशात् अंश: गृहीतोऽस्ति। एतत् महाकाव्यं एकोनविंशतिसर्गस्य वर्तते। प्रस्तुता: श्लोका: एतस्य द्वितीयसर्गात् उद्धृता:। एतेषु महाराजस्य दिलीपस्य गोसेवाया: वर्णनं विद्यते। एष महाकवि: गुप्तानां स्वर्णयुगस्य रत्नमस्ति।

अथ प्रजानामधिप: प्रभाते जायाप्रतिग्राहितगन्धमाल्याम्।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥1॥

**अन्वय: -** अथ प्रभाते प्रजानाम् अधिप: यशोधन: जायाप्रतिग्राहितगन्धमाल्याम् पीतप्रतिबद्धवत्सां ऋषे: धेनुं वनाय मुमोच।

**शब्दार्थ: -** अथ - तदनन्तरम्। यशोधन: - यशस्वी। प्रजानाम् - जनानाम्। अधिप: - स्वामी (दिलीप:) जायाप्रतिग्राहितगन्धमाल्याम् - जायया - पत्नया सुदक्षिणया, प्रतिग्राहिते - स्वीकारिते, गन्धमाल्ये - चन्दनमाले यया सा ताम्, पीतप्रतिबद्ध-वत्साम् - पूर्वं पीत: पश्चात् प्रतिबद्ध: बन्धनं नीत: वत्स: यस्या: सा ताम्। ऋषे:-मुने: (वशिष्ठस्य)। धेनुं - गाम् (नन्दिनीम्), मुमोच - मुक्तवान्।

स्थित: स्थितामुच्चलित: प्रयातां, निषेदुषीमासनबन्धधीर:।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥2॥

**अन्वय: -** भूपति: तां स्थितां स्थित:, प्रयाताम् उच्चलित:, निषेदुषीम् आसनबन्धधीर:, जलम् आददानां जलाभिलाषी (सन्) छाया इव अन्वगच्छत्।

**शब्दार्थ: -** भूपति: - नृप: (दिलीप:)। तां - गाम्। स्थितां - गमनात् विरमितां सतीं। स्थित: - अवस्थित:। प्रयाताम् - प्रस्थिताम्। उच्चलित: - प्रस्थित:। निषेदुषीम् - उपविष्टाम्। आसनबन्धधीर: - आसनबन्धे - उपवेशने। धीर: धैयपूर्वकम् उपविष्ट:। आददानाम् - गृह्णन्तीम्। जलाभिलाषी - जलपानेच्छुक: सन् छाया इव अन्वगच्छत् - अनुसृतवान्।

सा दुष्प्रधर्षा मनसाऽपि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन।
अलक्षिताभ्युत्पतनो नृपेण, प्रसह्य सिंह: किल तां चकर्ष ॥3॥

अन्वय: - सा हिंस्रै: मनसा अपि दुष्प्रधर्षा इति अद्रिशोभा प्रहितेक्षणेन नृपेण, अलक्षिताभ्युत्पतन: सिंह: तां प्रसह्य चकर्ष किल।

शब्दार्थ: - सा - नन्दिनी। हिंस्रै:- हिंसकै: हिंसकजन्तुभि:। मनसा अपि - चित्तेन अपि। दुष्प्रधर्षा - दुर्दमनीया। इति - अस्मात् हेतो:। अद्रिशोभाप्रहितेक्षणेन - अद्रे: हिमालयस्य शोभायां सौन्दर्ये प्रहितं - दत्तं ईक्षणं द्रष्टि: येन तेन, नृपेण - राज्ञा दिलीपेन। अलक्षिताभ्युत्पतन: - अलक्षितं - अदृष्टं अभ्युत्पतनं आभिमुख्येन आक्रमणं यस्य तादृश:। सिंह: - मृगेन्द्र:। तां - नन्दिनीम्। किल - निश्चयेन। प्रसध्य - हठात्। चकर्ष - आकृष्टवान्।

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्य:।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारि: ॥4॥

अन्वय: - तत: मृगेन्द्रगामी शरण्य: प्रसभोद्धृतारि: जाताभिषङ्ग: नृपति:। वध्यस्य मृगेन्द्रस्य वधाय निषङ्गात् शरं उद्धर्तुम् ऐच्छत्।

शब्दार्थ: - मृगेन्द्रगामी - सिंहसदृशगतिशील:। शरण्य: - शरणागतपालक:। प्रसभोद्धृतारि: - प्रसभेन हठात् उद्धृता: उन्मूलिता: अरय: शत्रव: येन तादृश: नृपति: - (राजा दिलीप:) जाताभिषङ्ग: - प्राप्त अनुभूताघात: सन् वध्यस्य - मारणीयस्य, मृगेन्द्रस्य - सिंहस्य। वधाय - घाताय। निषङ्गात् - तूणीरात्। शरम् - बाणम्। उद्धर्तुम् - निष्कासयितुम्। ऐच्छत्- अभिलषितवान्।

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचामनुवंशकेतुम्।
विस्माययन्विस्मितमात्मवृत्तौ, सिंहोरूसत्त्वं निजगाद सिंह: ॥5॥

अन्वय: - निगृहीतधेनु: सिंह: आर्यगृह्यं मनुवंशकेतुम् सिंहोरूसत्त्वं आत्मवृत्तौ विस्मितं तं मनुष्यवाचा विस्माययन् निजगाद।

शब्दार्थ: - निगृहीतधेनु: - निगृहीता नियन्त्रिता धेनु: येन तादृश:। सिंह: - केसरी आर्यगृह्यं आर्यै: सज्जनै:। गृह्यम् - सम्मान्यं। मनुवंशकेतुं - मनो: वैवस्वतस्य मनो: वंशस्य कुलस्य केतुं - ध्वजम् मनुवंशश्रेष्ठम्। सिंहोरुसत्त्वं - सिंहसदृशमहाबलिनम्। आत्मवृत्तौ - स्वचरिते। विस्मितं - चकितम्। तम् - राजानम्। मनुष्यवाचा - मानववाण्या विस्माययन् - आश्चर्यं प्रापयन्। निजगाद - अवोचत्।

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्तिरंह:, शिलोच्चये मूर्च्छति मारूतस्य ॥6॥

अन्वय: - महीपाल! तव श्रमेण अलम्। इत: प्रयुक्तम् अपि अस्त्रं वृथा स्यात्। मारुतस्य पादपोन्मूलनशक्तिरंह: शिलोच्चये न मूर्च्छति।

शब्दार्थ: - हे महीपाल! - हे भूप। तव - ते। श्रमेण - प्रयासेन। अलम् प्रयुक्तमपि - प्रक्षिप्तमपि। अस्त्रम् - आयुधम् वृथा- निरर्थकं। हि - यत:। मारुतस्य - वायो:। पादपोन्मूलनशक्ति - पादपानां वृक्षाणां उन्मूलने उत्पाटने शक्ति: सामर्थ्यं यस्य तादृशं। रंह: - वेग:। शिलोच्चये - पर्वते। मूर्च्छति न - प्रभवति।

स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥7॥

अन्वयः - स: त्वं लज्जां विहाय निवर्तस्व भवान् गुरोः दर्शितशिष्यभक्तिः यद् रक्ष्यम् शत्रेण अशक्यरक्ष्यम् (स्यात्) तद् शस्त्रभृतां यशः न क्षिणोति।

शब्दार्थः - विहाय - त्यक्त्वा। निवर्तस्व - परावर्तस्व। गुरोः - वशिष्ठस्य। दर्शितशिष्यभक्तिः - दर्शिता प्रकटीकृता शिष्यस्य भक्तिः पूज्येषु अनुरागबुद्धिःयेन तादृशः अस्तीति। यद् रक्ष्यम् - पाल्यम्। शस्त्रेण आयुधेन। अशक्यरक्ष्यम् - रक्षितुमशक्यम्, तद्। शस्त्रभृताम् - शस्त्रधारिणाम्। यशः - कीर्तिम्। न क्षिणोति - न नश्यति।

स त्वं मदीयेन शरीरवृत्तिं देहेननिर्वर्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥8॥

अन्वयः - स त्वं मदीयेन देहेन शरीरवृत्तिं निर्वर्तयितुं प्रसीद। महर्षेः इयम् दिनावसानोत्सुकबालवत्सा धेनुः विसृज्यताम्।

शब्दार्थः - मदीयेन - मामकेन। देहेन - शरीरेण। शरीरवृत्तिम् - शरीरजीविकां निर्वर्तयितुम् - सम्पादयितुम्। प्रसीद - अनुग्रहं कुरुष्व। दिनावसानोत्सुकबालवत्सा - दिवसस्य समाप्तौ उत्कण्ठितः वत्सः यस्याः सा एतादृशी। महर्षेः - वशिष्ठस्य। इयं - एषा। धेनुः-गौः। विसृज्यताम् - मुच्यताम्।

तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥9॥

अन्वयः - तस्मिन् क्षणे उग्रं सिंहनिपातम् उत्पश्यतः अवाङ्मुखस्य प्रजानां पालयितुः उपरि विद्याधरहस्तमुक्ता पुष्पवृष्टिः पपात।

शब्दार्थः - (सिंहाय स्वदेहार्पणकाले) उग्रम् - भयङ्करम्। सिंहनिपातम् - सिंहस्य (मृगराजस्य) निपातम् (आक्रमणम्)। उत्पश्यतः - उत्प्रेक्षमाणस्य। अवाङ्मुखस्य - अधोमुखस्य। प्रजानाम् - जनानाम्। पालयितुः - रक्षितुः। विद्याधरहस्तमुक्ता - विद्याधराणां देवयोनिविशेषाणां हस्तेभ्यः करेभ्यः मुक्ता विसृष्टा। पुष्पवृष्टिः - कुसुमानां वृष्टिः। पपात - अपतत् (बभूवेत्यर्थः)।

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्त्थितमुत्थितः सन्।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ॥10॥

अन्वयः - वत्स! उत्तिष्ठ, इति अमृतायमानं उत्थितं वचः निशम्य उत्थितः सन् राजा अग्रतः स्वां जननीम् इव प्रसविणीं गाम् ददर्श, सिंहम् न।

शब्दार्थः - अमृतायमानं - सुधासदृशम्, उत्त्थितम् - उत्पन्नम्। वचः - वचनम्। निशभ्य - श्रुत्वा। उत्त्थितः सन् - ऊर्ध्वावस्थितः सन्। अग्रतः - पुरतः। स्वाम् - स्वकीयाम्। जननीं-मातरम्। इव - सदृशम्। प्रस्रविणीम् - दुग्धस्राविणीम्। गाम् - धेनुम्।

## अभ्यासः

1. एकपदेन उत्तराणि दीयन्ताम्-

क. दिलीपः कस्य धेनुं मुमोच ?

ख. दिलीपस्य धर्मपत्न्याः नाम किमासीत् ?

ग. भूपतिः कां छायेव अन्वगच्छत् ?

घ. दिलीपः कस्य वधाय शरं उद्धर्तुम् ऐच्छत् ?

ङ. सिंहः मनुष्यवाचा कं निजगाद ?

च. राजा जननीमिव कां ददर्श ?

2. एकवाक्येन उत्तराणि दीयान्ताम्-

क. सुदक्षिणा कस्याः पूजाम् अकरोत् ?

ख. दिलीपः गोसेवां किमर्थं कृतवान् ?

ग. वशिष्ठस्य धेनोः उपरि कः आक्रमणं कृतवान् ?

घ. धेनोः रक्षार्थं दिलीपः किं कृतवान् ?

ङ. शस्त्रभृतां यशः कथं न क्षिणोति ?

3. अधोलिखितानां प्रश्नानां संस्कृतभाषया उत्तराणि दीयन्ताम्-

क. दिलीपः ऋषिधेनोः मुञ्चनार्थं किं प्रयत्नं कृतवान् ?

ख. अवाङ्मुखस्य दिलीपस्य उपरि कैः किमर्थञ्च पुष्पवृष्टिः पातिताः ?

ग. सिंहः दिलीपं किम् अवोचत् ?

4. समुचितपदैः रिक्तस्थानानि पूर्यन्ताम्-

क. अथ ........................प्रभाते जाया प्रतिग्राहितगन्धमाल्याम्।

ख. जलाभिलाषी जलमाददानां .................... तां भूपतिरन्वगच्छत्।

ग. न पादपोन्मूलनशक्तिरंहः...................... मूर्च्छति मारुतस्य।

घ. शस्त्रेण रक्ष्यं यदशक्यरक्ष्यं न तद्यशः ............... क्षिणोति।

ङ. स त्वं मदीयेन ................. देहेन निर्वर्तयितुं प्रसीद।

5. अधोलिखितानां शब्दानां सन्धिच्छेदं कृत्वा सन्धिनामानि लिखत-

यथा- छायेव - छाया + इव, गुणस्वरसन्धिः

क. जलाभिलाषी

ख. अन्वगच्छत्

ग. शिलोच्चये

घ. धेनुरियम्

ङ. अवाङ्मुखस्योपरि

6. अधोलिखितानां शब्दानां समासविग्रहं कृत्वा समासनामानि लिखत-

क. यशोधनः

ख. प्रसभोद्धृतारिः

ग. आर्यगृह्यम्

घ. विद्याधरहस्तमुक्ता

ङ. पुष्पवृष्टिः

7. पाठात् चित्वा विलोमपदानि लिखत-

क. सायङ्काले

ख. प्रयातां

ग. यशः

घ. शान्तम्

ङ. ऊर्ध्वमुखस्य

8. विशेषणानि विशेष्यैः सह मेलयत-

| | विशेषणानि | विशेष्याणि |
|---|---|---|
| क. | यशोधनः | तम् |
| ख. | आर्यगृह्यम् | ऋषेः धेनुम् |
| ग. | प्रजानाम् पालयितुः | अधिपः |
| घ. | प्रस्नविणीम् | दिलीपस्य |
| ङ. | पीतप्रतिबद्धवत्सां | गाम् |

9. अधोलिखितानां समानार्थकपदानि पाठात् चित्वा लिखत-

क. राजा

ख. केसरी

ग. दुर्दमनीया

घ. वेग:

ङ. त्रपाम्

च. कीर्तिम्

छ. पुत्र:

10. अधोलिखितानां प्रकृतिप्रत्ययं लिखत-

क. प्रयाताम्

ख. विहाय

ग. प्रयुक्तम्

घ. निर्वर्तयितुम्

ङ. उत्थित:

योग्यताविस्तार:-

- अस्य पाठस्य श्लोकानां घटनाक्रमानुसारं कथां लिखत।
- गो: महत्त्वम् इतिविषयम् आधृत्य पञ्चदशवाक्यात्मको लेख: लेखनीय:।
- आचार्यनिर्देशे रघुवंशमहाकाव्यानुसारेण रघुवंशोद्भवानां नृपाणां नामानि लिखत।

❖ ❖ ❖

# चतुर्दशः पाठः

# मोहः बन्धस्य कारणम्

नीतिकथेयं हितोपदेशात् सङ्गृहीता अस्ति । संस्कृतकथासाहित्येषु श्रीनारायण-पण्डितरचितोऽयं कथाग्रन्थः अतीव प्रसिद्धः । जनाः मोहग्रस्ताः सन्तः कथं विपत्सागरे पतन्ति इति भावं प्रदर्शयन्ती एषा कथा मोहादुद्धर्तुमुपदिशति । समागतायां विपत्तौ धैर्यम् अवलम्ब्य परस्पर मिलित्वैव समाधानं करणीयम् इत्यपि अस्याः मूलम् ।

आसीत् गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति स्म । अथ कदाचिदवसन्नायां रात्र्यामस्ताचलस्थिते भगवति कुमुदिनीनायके चन्द्रमसि तत्रैव कश्चिद् व्याधस्तण्डुलान् विकीर्य जालं विस्तीर्य प्रच्छन्नो भूत्वा स्थितश्च । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पस्तांस्तण्डुलकणानवलोकयामास । ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह । ''कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः । एतन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । सर्वथाऽविचारितं कर्म न कर्त्तव्यम् ।'' इत्येतद्वचनं श्रुत्वा कश्चित् तरुणः कपोतः सदर्पमाह आः ! किमेवमुच्यते ।

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ॥ इति

एतदाकर्ण्य सर्वे कपोतास्तत्रोपविष्टाः । यतो बहुश्रुता अपि लोभमोहिताः क्लिश्यन्ते । उक्तं हि-

असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिनीभवन्ति ॥

तत्र ते सर्वे जालेन बद्धा अभवन् । ततो यस्य वचनात्तत्रावतीर्णास्तं सर्वे तिरस्कुर्वन्ति स्म । तच्छ्रुत्वा चित्रग्रीवोऽवदत्-नायमस्य दोषः । यत आपतन्तीनामापदां हितोऽपि हेतुतामायाति । विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् । यतः-

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

अन्यच्च-

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥

इदानीं क्रियतामेवम्। सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्। इति निश्चित्य पक्षिण: सर्वे सहसैव जालमादायोत्पतिता: । अनन्तरं स व्याध: सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत्।

संहतास्तु हरन्तीमे जालं मम विहङ्गमा: ।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥

किन्तु चक्षुर्विषयमतिक्रान्तेषु कपोतेषु स व्याध: सखेदं निवृत्त:। अथ लुब्धकं निवृत्तं दृष्ट्वा ते पक्षिणोऽवदन्। किमिदानीं कर्तुमुचितम् । चित्रग्रीवोऽभाषत । ''अस्माकं मित्रं हिरण्यको नाम मूषकराजो गण्डकीतीरे चित्रवने निवसति । सोऽस्माकं पाशांश्छेत्स्यति।'' इत्यालोच्य सर्वे हिरण्यकविवरसमीपं प्राप्ता:। ततो हिरण्यक: कपोतराजस्य वचनं प्रत्यभिज्ञाय ससम्भ्रमं शतद्वारात् स्वविवराद् बहिर्नि:सृत्याब्रवीत्। ''आ: पुण्यवानस्मि। प्रियसुहृन्मे चित्रग्रीव: समायात:। तथा हि-

यस्य मित्रेण सम्भाषा यस्य मित्रेण संस्थिति: ।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यभाक् ॥

पाशबद्धांश्चैतान् दृष्ट्वा सविस्मय: क्षणं तूष्णीं स्थित्वाऽपृच्छत्-''सखे, किमेतत्''। चित्रग्रीवोऽवदत्-वयस्य, अस्माकं कर्मण: फलमेतत्।'' एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपासर्पत्। तदा चित्रग्रीव आह-''मित्र, मा मैवम्। प्रथमं तावदस्मदाश्रितानामेषां पाशांश्छिन्धि । मम पाशान् पश्चाच्छेत्स्यसि ।'' इत्याकर्ण्य हिरण्यक: प्रहृष्टमना: पुलकित: सन्नब्रवीत् । ''साधु, सखे साधु । अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते ।'' एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि, आतिथ्यं च सम्पादितम्। ततश्चित्रग्रीवस्तमामन्त्र्य सपरिवारम् इष्टदेशान् प्रायात्। हिरण्यकोऽपि स्वविवरं प्रविष्ट:।

## शब्दार्थ:

शाल्मलीतरु - सेमलवृक्ष:। अवसन्नायां - समाप्तायाम्। अस्ताचलस्थिते - अस्ताचलपर्वतस्थिते गते। कुमुदिनीनायके-चन्द्रे (चन्द्रोदये कुमुदिनीविकसतीत्यर्थ:) विस्तीर्य - प्रसार्य । प्रच्छन्न: - गुप्त: । वियति - आकाशे । विसर्प: - प्रसारितान् निरुप्यतां - विचार्यताम् । अवलोकयामास - दृष्टवान् । सदर्पम् - अहङ्कारयुक्तम् । अप्रवर्तमानम् - काठिन्यम् । बहुश्रुता: - अनुभवसम्पन्ना:, क्लिश्यन्ते = दु:खिता: भवन्ति। लुलुभे - मोहित: जात: । धिय: - बुद्धय: । पुंसां - मनुष्याणां । हेममृगस्य - स्वर्णहरिणस्य । मलिनी - कुण्ठिता । अवतीर्णा: - अवतरिता: । आपतन्तीनाम् - समुपगतानाम् । हेतुताम् - कारणताम् । कापुरुषस्य - धैर्यहीनपुरुषस्य। प्रतीकार: - प्रत्युत्तरम्। विपदि - विपत्तौ। अभ्युदये - अभ्युन्नतौ। सदसि - सभायाम्। युधि - युद्धे। विक्रम: - पराक्रम:। यशांसि - कीर्तौ। अभिरुचि: - वृत्ति:। श्रुतौ - शास्त्रेषु। ज्ञातव्या: - वक्तव्या:। भूतिं - ऐश्वर्यम्। संहता: - एकीभूता:। हरन्ति - हरणं कुर्वन्ति, नयन्ति। चक्षुर्विषयम् - दृष्टिगोचरताम्। अतिक्रान्तेषु - सञ्जातेषु। निवृत्त: - निर्गत:। पाशान्-जालम्। छेत्स्यति - कर्तनं करिष्यति। प्रत्यभिज्ञाय - ज्ञात्वा ससम्भ्रमं - शीघ्रम्। पुण्यभाक् - पुण्यशील:। उपासर्पत् - समीपम् अगच्छत्। छिन्धि - कर्तय। प्रहृष्टमना: - प्रसन्नचित्त:। युज्यते - लभ्यते। प्रभुत्वं - श्रेष्ठत्वं नेतृत्वञ्च।

## अभ्यासः

1. एकपदेन उत्तरं लिखत-

    क. शाल्मलीतरुः कुत्र अस्ति ?

    ख. कपोतराजस्य नाम किम् आसीत् ?

    ग. केन तण्डुलकणाः विकीर्णाः ?

    घ. पुरुषेण कति दोषाः हातव्याः ?

    ङ. हिरण्यकः कुत्र निवसति स्म ?

2. एकवाक्येन उत्तरं लिखत-

    क. पुंसां धीः कदा मलिनी भवति ?

    ख. चित्रग्रीवस्य मित्रस्य नाम किम् ?

    ग. जालमादाय पक्षिणः कुत्र उड्डयन्ते ?

    घ. वृद्धानां वचनं कदा ग्राह्यम् ?

    ङ. चित्रग्रीवः हिरण्यकं किम् अवदत् ?

3. अधोलिखितप्रश्नानां उत्तराणि लिखत-

    क. किमर्थं भूमिमवतीर्णाः कपोताः ?

    ख. कः उपायश्चिन्तितश्चित्रग्रीवेण जालादात्मानं मोचयितुम् ?

    ग. कथं निकृन्तितं हिरण्यकेन तज्जालम् ?

    घ. पुरुषस्य षड् दोषाः के के सन्ति ?

    ङ. विपत्काले किं करणीयम् ?

4. शुद्धकथनानां समक्षम् ''आम्'' अशुद्धकथनानां समक्षं ''न'' इति लिखत-

    क. विपत्काले विस्मय एव कापुरुषलक्षणम्।

    ख. पक्षिणः सर्वे सहसैव जालमादायोत्पतिताः।

    ग. मूषकराजः गोदावरीतीरे निवसति।

    घ. चक्षुर्विषयमतिक्रान्तेषु कपोतेषु व्याधः प्रसन्नः निवृत्तः।

    ङ. हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपासर्पत।

    च. चित्रग्रीवः हिरण्यकमामन्त्र्य सपरिवारम् इष्टदेशान् प्रायात्।

5. रिक्तस्थानानि पूरयत-

क. तत्र ते सर्वे जालेन बद्धा ..................... ।

ख. आसीत् .................... विशाल: शाल्मलीतरु: ।

ग. सर्वथाऽविचारितं कर्म न .................... ।

घ. हिरण्यकोऽपि ................... प्रविष्ट: ।

ङ. कुतोऽत्र निर्जने .................... तण्डुलकणानां सम्भव: ।

6. अधोलिखितानां पदानां यथोचितं सन्धिं सन्धिविच्छेदं वा कृत्वा सन्धे: नाम लिखत-

| | शब्द: | सन्धि:/सन्धिविच्छेद: | सन्धे: नाम |
|---|---|---|---|
| क. | दिग्देशादागत्य | ............... | ............... |
| ख. | ............... | इति + एतद् | ............... |
| ग. | ............... | नि: + जन: | ............... |
| घ. | एतदाकर्ण्य | ............... | ............... |
| ङ. | ............... | तत् + श्रुत्वा | ............... |
| च. | हितोऽपि | ............... | ............... |

7. अधोलिखितानां पदानां मूलशब्दं विभक्तिं वचनं लिङ्गं च लिखत-

| | पदानि | मूलशब्द: | विभक्ति: | वचनम् | लिङ्गम् |
|---|---|---|---|---|---|
| क. | हेममृगस्य | ............. | ........... | ............. | ........... |
| ख. | मृगाय | ............. | ........... | ............. | ........... |
| ग. | जालेन | ............. | ........... | ............. | ........... |
| घ. | कपोतेषु | ............. | ........... | ............. | ........... |
| ङ. | तेन | ............. | ........... | ............. | ........... |

8. अधोलिखितानां क्रियापदानां धातुं वचनं पुरुषं च लिखत-

| | क्रियापदानि | धातु: | पुरुष: | वचनम् |
|---|---|---|---|---|
| क. | पश्यामि | ........... | ............. | ........... |
| ख. | अभवन् | ........... | ............. | ........... |

| | | | | |
|---|---|---|---|---|
| ग. | अचिन्तयत् | ........... | ............. | ........... |
| घ. | अपृच्छत् | ........... | ............. | ........... |
| ङ. | निवसन्ति | ........... | ............. | ........... |

9. निम्नलिखितशब्दानां पर्यायशब्दान् लिखत-

क. रात्रिः

ख. व्याधः

ग. कपोतः

घ. वनम्

ङ. तरुणः

10. अधोलिखितानां विलोमपदानि पाठात् चित्वा लिखत-

| | पदानि | विलोमपदानि |
|---|---|---|
| क. | शत्रुः | |
| ख. | अभयम् | |
| ग. | अनिद्रा | |
| घ. | उदयाचलः | |
| ङ. | नायिका | |

11. अधोलिखितेषु पदेषु प्रकृतिप्रत्ययसंयोजनं कुरुत-

| | शब्दाः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| क. | कर्त्तुम् | ...................... | .................. |
| ख. | दृष्ट्वा | ...................... | .................. |
| ग. | स्थित्वा | ...................... | .................. |
| घ. | आदाय | ...................... | .................. |
| ङ. | आगत्य | ...................... | .................. |
| च. | भूत्वा | ...................... | .................. |

12. अधोलिखिताः पङ्क्तीः कः कम् प्रति कथयति -

| पङ्क्तिः | कः | कम् |
| --- | --- | --- |
| क. सर्वथाऽविचारितं कर्म न कर्त्तव्यम्। | | |
| ख. आः किमेवमुच्यते ? | | |
| ग. तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। | | |
| घ. प्रियसुहृन्मे चित्रग्रीवः समायातः। | | |
| ङ. अस्माकं कर्मणः फलमेतत्। | | |

योग्यताविस्तारः-

- अत्र प्रदत्ताः श्लोकाः कण्ठस्थी करणीयाः।
- लोभात् बन्धनस्य सङ्गात् मुक्तेश्च अन्यानि उदाहरणानि सङ्कलनीयानि।

❖ ❖ ❖

पञ्चदशः पाठः

# भारतधरणीयम्

संस्कृतसाहित्यमतीवसमृद्धम्, लालित्यपूर्णञ्च विद्यते । वेदेभ्यः आरभ्य अधुनाऽपि संस्कृतकाव्यधारा निर्बाधा प्रवहति । वाल्मीकि-व्यास-भास-कालिदास-श्रीहर्ष-माघ-भारवि-बाणादयः कवयस्तु विश्वप्रसिद्धाः वर्तन्ते । आधुनिककालेऽपि अनेके कवयः संस्कृतकाव्यरचनायां सिद्धाः । आधुनिकेन काव्येन सह अस्माकं परिचयः स्यात्तदर्थमत्र एकं नवगीतं प्रस्तुतम् । एतस्य नवगीतस्य कविः 'जि. महाबलेश्वरभट्टः' दक्षिणभारते प्रसिद्धः उत्तरे भारतेऽपि तस्य ख्यातिःप्रसरति । अत्र तस्य भारतभक्तिभावपूरितं गीतमेकं प्रस्तूयते ।

भुवमवतीर्णा नाकस्पर्धिनी
भारतधरणीयं, मामकजननीयम् ॥
शिरसि हिमालय-मुकुट-विराजिता
पादे जलधिजलेन परिप्लुता
मध्ये गङ्गापरिसर-पूता
भारतधरणीयं, मामक-जननीयम् ॥ भुवमवतीर्णा .... ॥
काश्मीरेषु च वर्षति तुहिनम्
राजस्थाने प्रदहति पुलिनम्
मलयस्थाने वाति सुपवनः
भारतधरणीयं मामकजननीयम् ॥ भुवमवतीर्णा .... ॥
नानाभाषि-जनाश्रय-दात्री
विविध-मतानां पोषणकर्त्री
नानातीर्थ-क्षेत्रसवित्री
भारतधरणीयं, मामकजननीयम् ॥ भुवमवतीर्णा .... ॥
पुण्यवतामियमेव हि नाकः
पुण्यजनानां रुद्रपिनाकः
पुण्यपराणामाश्रयलोकः
भारतधरणीयं, मामकजननीयम् ॥ भुवमवतीर्णा .... ॥

## शब्दार्थ:

धरणी -भूमि: । भुवम् -पृथ्वीम् । अवतीर्णा -स्वर्गात् भूभौ आगता । जलधि -सागर । परिप्लुता -परिमग्ना । पूता-पवित्रा । तुहिनम् -हिमम् । पुलिनम् -तटम् । वाति -प्रवहति । पुण्यवताम् -पुण्यशालिनाम् । नाक: - स्वर्ग: ।

## अभ्यास:

1. अधोलिखितान् प्रश्नान् संस्कृतभाषया उत्तरत-

क. नाकस्पर्धिनी का अस्ति ?

ख. तुहिनं कुत्र वर्षति ?

ग. पुण्यवतां नाक: किम् ?

घ. मलयस्थाने कीदृश: पवन: वाति ?

ङ. कस्या: शिरसि हिमालय: मुकुटरूपेण विराजते ?

च. इयम् भारतधरणी केषाम् आश्रयलोक: अस्ति ?

2. कोष्ठकात् उचितानि पदानि चित्वा रिक्तस्थानानि पूरयत-

(भारतधरणीयम्, पोषणकर्त्री, इयमेव, जलधिजलेन, राजस्थाने)

क. पादे......................... परिप्लुता ।

ख. ....................... प्रदहति पुलिनम् ।

ग. विविधमतानां ......................... ।

घ. पुण्यवताम् .................... हि नाक: ।

ङ. .................. मामकजननीयम् ।

3. यथोचितं योजयत -

| | ‘अ‘ | ‘ब’ |
|---|---|---|
| क. | मलयस्थाने | जनाश्रयदात्री |
| ख. | नानाभाषि | वर्षति तुहिनम् |
| ग. | पुण्यजनानां | वाति सुपवन: |
| घ. | काश्मीरेषु च | रुद्रपिनाक: |

4. अधोलिखितानां शब्दानां समासविग्रहं कृत्वा समासनामानि लिखत-

क. नाकस्पर्धिनी

ख. सुपवन:

ग. रुद्रपिनाक:

घ. आश्रयलोक:

5. पाठात् चित्वा समानार्थकपदानि लिखत-

क. स्वर्ग:

ख. मस्तके

ग. समुद्रम्

घ. हिमम्

6. पाठात् चित्वा विलोमपदानि लिखत-

क. कुपवन:

ख. शोषणकर्त्री

ग. पापम्

घ. सा

ङ. तावकम्

7. अधोलिखितपङ्क्तीनां भावम् अनुसृत्य पाठात् चित्वा पङ्क्तिं लिखत-

क. भारतस्य मस्तके हिमालय: मुकुटवत् विराजते। ....................

ख. राजस्थानप्रान्ते सिकताधिक्येन ग्रीष्म: प्रचण्ड: भवति। ....................

ग. पुण्यशालिनां भारतभूरेव स्वर्गतुल्या। ....................

घ. एषा भारतभूमि: मम माता अस्ति। ....................

योग्यताविस्तार:-

- पाठं पठित्वा भारतदेशस्य वैशिष्ट्यं लिखत।
- अन्यग्रन्थेभ्य: राष्ट्रसम्बन्धिगीतानि चित्वा पुस्तिकायां लेखनीयानि।

❖ ❖ ❖

**षोडशः पाठः**

# शुकनासोपदेशः

*संस्कृतभाषायाः यथा पद्यसाहित्यं समृद्धं, तथैव गद्यसाहित्यम् अपि । महाकविबाणभट्टः, महाकविदण्डी, अम्बिकादत्तव्यासः, इत्यादयः अनेके गद्यकाराः सञ्जाताः । गद्यस्य लालित्यम् अत्यद्भुतम् । गद्यविधायाः विकासः वैदिककालादेव सञ्जातः । अधुनाऽपि गद्यविधायां लेखनं प्रचलत्येव। अत्र खलु महाकवेः बाणभट्टस्य प्रसिद्धरचनायाः कादम्बर्याः एकः अंशः गृहीतोऽस्ति। शुकनासचन्द्रापीडयोः संवादः प्रशस्यः । अत्र शुकनासः राज्ञः तारापीडस्य पुत्रं चन्द्रापीडम् उपदिशति । तस्यैव संवादस्य सम्पादितोंऽशः अत्र प्रस्तुतः । बाणः सप्तमशताब्दे ईसवीये महाराजहर्षस्य सभारत्नमासीत् ।*

तात चन्द्रापीड़ ! निसर्गतः एव अतिगहनं तमो यौवनप्रभवम्। अपगतमले हि स्फटिकमणौ इव रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणाः। गुरुवचनम् अमलमपि सलिलम् इव महदुपजनयति श्रवणस्थितं शूलम् अभव्यस्य।अयमेव ते कालः उपदेशस्य। गुरूपदेशश्च नाम पुरुषाणाम् अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण राज्ञाम्।विरला हि तेषामुपदेष्टारः। अहङ्कारमूला हि राजप्रकृतिः। प्रतिशब्दक इवानुगच्छति राजवचनम् जनो भयात्। उद्दामदर्पाश्च उपदिश्यमानमपि ते न शृष्वन्ति। शृण्वन्तोऽपि च खेदयन्ति हितोपदेशदायिनो गुरून्।

आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि लब्धापि दुःखेन परिपाल्यते। न परिचयं रक्षति। अभिजनमीक्षते। न कुलक्रमम् अनुवर्तते न शीलं पश्यति, नाचारं परिपालयति, न सत्यम् अनुबुध्यते, न वैदग्ध्यं गणयति। यथा यथा चेयं चपला दीव्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलम् उद्वमति।

राज्यतन्त्रे अस्मिन् महामोहकारिणि च यौवने कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः न धिक् क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः न वञ्च्यसे धूर्तैः।

कामं भवान् प्रकृत्यैव धीरः पित्रा च समारोपितसंस्कारः। तथापि भवद्गुणसंतोषः मामेवं मुखरी कृतवान्। सर्वथा कल्याणैः पित्रा क्रियमाणम् अनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम्। विजितामपि तव पित्रा सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्।

## शब्दार्थः

निसर्गतः - स्वभावतः यौवनप्रभवम्-यौवनं तारुण्यं ततः प्रभवः उत्पत्तिः यस्य एवं विधं तमः अज्ञानम्। अपगतमले - दोषरहिते। रजनिकरगभस्तयः - रजनिकरः चन्द्रः तस्य गभस्तयः किरणाः (चन्द्रमा की किरणें)। विशन्ति-प्रविशन्ति। उपदेशगुणाः-

शिक्षागुणा: । अमलमपि - निर्मलम् अपि । महत्-महान् । उपजनयति-उत्पादयति शूलम्-कष्टं । अभव्यस्य-अपात्रस्य (अपात्रके) । अखिलमलप्रक्षालनक्षमम्-अखिलं समग्रं यत् मलं कालुष्यं तस्य प्रक्षालनं शुचीकरणं तत्र क्षमं समर्थम् । अजलं - जलरहितम् । प्रतिशब्दक इव - प्रतिध्वनि: इव । अनुगच्छति - अनुसरति । उद्दामदर्पाश्च-उद्दाम: उत्कट: दर्प: अहंकार: येषां ते । (अतिअहंकारयुक्ता:) । उपदिश्यमानमपि-कथ्यमानम् हितोपदेशमपि । खेदयन्ति - दु:खं प्रापयन्ति । कल्याणाभिनिवेशी-कल्याणे मङ्गले अभिनिवेश: आग्रह: यस्य एवंभूत: त्वं (कल्याण चाहने वाले आप) । लब्धापि - प्राप्तापि । परिपाल्यते - रक्ष्यते । परिचयं-संस्तवं । अभिजनम् - कुलीनं । ईक्षते-अवलोकयति । कुलक्रमम्-कुलपरिपाटि: । अनुवर्तते - अनुगच्छति । अनुबुध्यते - जानाति । दीप्यते - दीप्ता भवति । प्रयतेथा: - प्रयत्नं कुरू (प्रयत्न करो)। नवयौवराज्याभिषेकमङ्गलम्-नवयौवनस्य य: राज्याभिषेक: तल्लक्षणं यन्मङ्गलं श्रेय: (नये युवराजपद के लिये किये जाने वाले मङ्गल को) । सप्तद्वीपभूषणां - सप्त संख्याका द्वीपा जम्बूप्रभृतयो भूषणं यस्या सा (सात द्वीपो के आभूषण वाली) । विजयस्व- स्वायत्तीकुरु ।

## अभ्यास:

1. एकपदेन उत्तरं दीयताम्-

क. चन्द्रापीड: कस्य पुत्र आसीत् ?

ख. यौवनप्रभवं तम: कथं भवति ?

ग. पुरुषाणाम् अजलं स्नानं किम् ?

घ. क: परिचयं न रक्षति ?

ङ. पित्रा समारोपितसंस्कार: क: आसीत् ?

2. एकवाक्येन उत्तराणि दीयन्ताम्-

क. गुरुवचनम् कस्य श्रवणस्थितं शूलं जनयति ?

ख. उपदेशगुणा: सुखेन कुत्र विशन्ति ?

ग. लक्ष्मी: दीपशिखेव किम् उद्वमति ?

घ. जन: राजवचनं किमिव अनुगच्छति ?

ङ. लब्धापि दु:खेन का परिपाल्यते ?

3. अधोलिखितप्रश्नानाम् उत्तराणि दीयन्ताम् -

क. अयं पाठ: कस्माद् ग्रन्थात् सङ्ग्रहीत: कश्च तस्य लेखक: ?

ख. महामोहकारिणि राज्यतन्त्रे चन्द्रापीड: कथं व्यवहर्तुमुपविष्ट: ?

ग. पाठेऽस्मिन् लक्ष्म्या: के के दोषा: वर्णिता: सन्ति ?

घ. आचार्य: शुकनास: युवराजाय कां शुभकामनाम् अयच्छत् ?

4. सन्धिः सन्धिविच्छेदश्च क्रियताम्-

क. महदुपजनयति

ख. गुरूपदेशः

ग. इव + अनुगच्छति

घ. कल्याणाभिनिवेशी

ङ. न + उपहस्यसे

च. प्रकृत्यैव

छ. दीपशिखेव

5. प्रदत्तविग्रहपदानां स्थाने समस्तपदानि पठात् चित्वा लिखत-

| | विग्रहपदानि | समस्तपदानि |
|---|---|---|
| क. | यौवनात् प्रभवः यस्य तत् | .............................. |
| ख. | गुरोः वचनम् | .............................. |
| ग. | प्रक्षालने क्षमम् | .............................. |
| घ. | उपदेशानां गुणाः | .............................. |
| ङ. | उद्दामः दर्पः येषां ते | .............................. |
| च. | दीपस्य शिखा इव | .............................. |
| छ. | कज्जलम् इव मलिनम् | .............................. |

6. पदानां अर्थमेलनम् क्रियताम्-

| | पदानि | अर्थाः |
|---|---|---|
| क. | निसर्गतः | प्रतिध्वनिः |
| ख. | रजनिकरः | चञ्चला |
| ग. | अभव्यस्य | विद्वत्ताम् |
| घ. | प्रतिशब्दकः | किरणाः |
| ङ. | चपला | स्वभावतः |
| च. | वैदग्ध्यम् | कुलीनम् |
| छ. | अभिजनम् | अपात्रस्य |
| ज. | गभस्तयः | चन्द्रः |

7. उपयुक्तपदेन रिक्तस्थानस्यपूर्तिः क्रियताम्-

(कालः, गुरूपदेशः तेषाम्, शीलम्, भयात्)

क. .......................... पुरुषाणाम्अखिलमलप्रक्षालनक्षमम् ।

ख. अयमेव ते ..................... उपदेशस्य ।

ग. जनः .................... राजवचनम् अनुगच्छति ।

घ. विरला हि ......................... उपदेष्टारः ।

ङ. न .................................. पश्यति ।

8. शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत-

क. शुकनासः चन्द्रापीडस्य महाकाव्यः आसीत् ।

ख. गुरोः उपदेशः अजलं स्नानं कथ्यते ।

ग. राज्ञाम् उपदेष्टार विरला न भवन्ति ।

घ. लक्ष्मी लब्धापि दुःखेन परिपाल्यते ।

ङ. चन्द्रापीडः प्रकृत्या धीरः न आसीत् ।

च. जनः भयात् राजवचनम् अनुगच्छति ।

9. पाठात् चित्वा विपरीतार्थकशब्दं लिखत-

क. खिलः

ख. निर्मलः

ग. अविरलाः

घ. अधीरः

ङ. अलीकम्

10. निर्दिष्टशब्दरूपैः वाक्यानि पूरयत-

यथा- विरला हि तेषाम् उपदेष्टारः । (तत्-षष्ठी)

क. ते उपदेशस्य ........... एव कालः । (एतद्-प्रथमा)

ख. .................... प्रकृत्या एव धीरः । (भवत्-प्रथमा)

ग. .............. न श्रृणोति । (तद्-प्रथमा)

घ. प्राप्तापि .................... दुःखेन रक्ष्यते । (इदम्-प्रथमा)

ङ. ................ विजितामपि वसुन्धरां पुनः विजयस्व । (पितृ-तृतीया)

11. धातुरूपैः वाक्यानि पूरयत-

| | | |
|---|---|---|
| क. | लक्ष्मीः परिचयं न .................... | (रक्ष्-लट्) |
| ख. | राज्ञाम् उपदेष्टारः विरलाः एव.................... | (भू-लट्) |
| ग. | उद्दामदर्पा ते उपदिश्यमानमपि न .................... | (श्रु-लट्) |
| घ. | खलः गुरुं न.................... | (गण्-लट्) |

12. (अ) पाठस्य निष्कर्षः-

क. युवावस्थायां गुरोः उपदेशः परमावश्यकः भवति।

ख. निर्मले मनसि गुरोः उपदेशः सुखेन प्रविशति।

ग. राज्ञां कृतेऽपि गुरूपदेशः परमोपयोगी भवति।

घ. लक्ष्मी प्राप्य प्रमादः मा कर्तव्यः।

ङ. कर्त्तव्यं सर्वथा सावधानतया करणीयम् भवति।

(ब) पाठेऽस्मिन् लक्ष्म्याः दोषाः वर्णिताः तेषु पञ्चदोषान् चित्वा लिखत-

क.

ख.

ग.

घ.

ङ.

योग्यताविस्तारः-

- अन्यमहापुरुषाणां उपदेशाः ग्रन्थेभ्यः सञ्चयनीयाः।
- संस्कृतगद्यकाराणां नामानि कृतयश्च आचार्यैः ज्ञात्वा सूचीबद्धाः करणीयाः।

❖ ❖ ❖

## सप्तदशः पाठः

# शुक्रनीतिः

संस्कृतसाहित्ये नैके नीतिग्रन्थाः प्रसिद्धाः सन्ति। तेषु शुक्रनीतिरितिग्रन्थस्य स्थानम् अतीव महत्त्वपूर्णम्। परम्परानुसारेण एषा शुक्रस्य रचना स्वीकृतास्ति। प्रामुख्येन राजनीतेः प्रख्यापकोऽयं ग्रन्थः। अस्मिन् राजा राज्यं प्रजाश्चेति त्रीणि तत्त्वानि वर्तन्ते। येषां कर्त्तव्याणां निर्देशः अस्य ग्रन्थस्य प्रमुखो वर्ण्यविषयः। प्रस्तूयन्ते केचित् श्लोकाः। ये लोकाचारं व्यवहारज्ञानं च प्रदाय अस्माकं जीवनपथं परिष्कुर्वन्ति।

बुद्धिरुत्पद्यते तादृक् यादृक् कर्मफलोदयः।
सहायास्तादृशा एव यादृशी भवितव्यता ॥ 1 ॥

अन्वयः - यादृक् कर्मफलोदयः तादृक् बुद्धिः उत्पद्यते, यादृशी भवितव्यता तादृशाः एव सहायाः।

शब्दार्थः - यादृक् - यत्प्रकारकः। कर्मफलोदयः कर्मफलस्य पूर्व कर्मणां परिणामस्य उदयः उद्गमः। तादृक् - तत्प्रकारिका। बुद्धिः - मतिः। उत्पद्यते - सञ्जायते। यादृशी - यत्प्रकारिका। भवितव्यता - भागधेयम्। तादृशाः- तत्प्रकारकाः। एव - केवलम्। सहायाः - सहायकाः भवन्तीति भावः।

धीमन्तो वन्द्यचरिता मन्यन्ते पौरुषं महत्।
अशक्ताः पौरुषं कर्तुं क्लीबा दैवमुपासते ॥ 2 ॥

अन्वयः - धीमन्तः वन्द्यचरिताः पौरुषं महत् मन्यन्ते, क्लीबाः पौरुषं कर्तुम् अशक्ताः दैवम् उपासते।

शब्दार्थः - धीमन्तः - बुद्धिमन्तः। वन्द्यचरिताः - वन्दनीयचरित्राः। पौरुषम् - पुरुषार्थम्। महत् - महनीयम्। मन्यन्ते - स्वीक्रियन्ते। क्लीबाः - पुरुषत्वविहीनजनाः। पौरुषम् - साहसम्। कर्त्तुम् - विधातुम्। अशक्ताः - असमर्थाः। दैवम् - भाग्यम्। उपासते - आश्रयन्तीति भावः।

भवतीष्टं सत्क्रिययानिष्टं तद्विपरीतया।
शास्त्रतः सदसज्ज्ञात्वा त्यक्त्वाऽसत्सत् समाचरेत् ॥ 3 ॥

अन्वयः - सत्क्रियया इष्टं भवति, तद्विपरीतया अनिष्टं भवति। अतः शास्त्रतः सदसत् ज्ञात्वा असत् त्यक्त्वा सत् समाचरेत्।

शब्दार्थः - सत्क्रियया - साधुकर्मणा। इष्टम् - यथेप्सितं फलम्। भवति - याति। तत् - सत्क्रियया। विपरीतया - असत्क्रियया। अनिष्टम् - अनपेक्षितं भवति। अतः शास्त्रतः - शास्त्रानुसारेण। सदसत् - साध्वसाधुकार्यम्। ज्ञात्वा - विचार्य। असत् - असाधुकार्यम्। त्यक्त्वा - परित्यज्य। सत् - साधुकार्यम्। समाचरेत् - सुष्ठुतया व्यवहरेत्।

वेणो नष्टस्त्वधर्मेण पृथुर्वृद्धस्तु धर्मतः।

तस्माद्धर्मं पुरस्कृत्य यतेतार्थाय पार्थिवः॥ 4॥

अन्वयः - वेणुः तु अधर्मेण नष्टः, पृथुः तु धर्मतः वृद्धः। तस्मात् पार्थिवः धर्मं पुरस्कृत्य अर्थाय यतेत।

शब्दार्थः - वेणुः - कोऽपि पौराणिको राजा, तु इति बलात्मकोऽव्ययः। अधर्मेण - अपकर्मणा। नष्टः - नाशं गतः। तु - किन्तु। पृथुः - वेणुपुत्रः। धर्मतः - धर्माचरणेन। वृद्धः - समृद्धिमुपगतः। तस्मात् - तेन हेतुना। पार्थिवः - राजा। धर्मम् - सत्कर्म। पुरस्कृत्य - समाश्रित्य। अर्थाय - धनाय। यतेत - प्रयासं कुर्यादिति।

नयस्य विनयो मूलं विनयः शास्त्रनिश्चयात्।

विनयस्येन्द्रियजयस्तद्युक्तः शास्त्रमृच्छति॥ 5॥

अन्वयः - विनयः नयस्य मूलं, विनयश्च शास्त्रनिश्चयात् , इन्द्रियजयः विनयस्यमूलं, तद्युक्तः शास्त्रमृच्छति।

शब्दार्थः - विनयः -नम्रता । नयस्य - नीतेः। मूलम् - उपक्रमः। विनयश्च - सौजन्यञ्च। शास्त्रनिश्चयात् - शास्त्रस्य तत्वज्ञानात् भवति। इन्द्रियजयः - जितेन्द्रियत्वम्। विनयस्य - शालीनतायाः। मूलम्, तद्युक्तः - तदन्वितः। शास्त्रमृच्छति - विज्ञानमधिगच्छति।

विषयामिषलोभेन मनः प्रेरयतीन्द्रियम्।

तन्निरुध्यात् प्रयत्नेन जिते तस्मिन् जितेन्द्रियः॥ 6॥

अन्वयः - मनः विषयामिषलोभेन इन्द्रियम् प्रेरयति, प्रयत्नेन तन्निरुध्यात्, तस्मिन् जिते जितेन्द्रियः।

शब्दार्थः- मनः - चित्तम्। विषयाः - अर्था एव। आमिषाणि - पिशितानि। उपभोग्य-वस्तूनीत्यर्थः। तेषु लोभेन - प्राप्तीच्छया। इन्द्रियम् - चक्षुरादिकम्। प्रेरयति - प्रेरणां ददाति। प्रयत्नेन - सप्रयासेन। तत् - मनः। निरुध्यात् - अवरुध्यात्। तस्मिन् - मनसि। जिते - वशीकृते। जितेन्द्रियः - इन्द्रियजेता भवति।

अरक्षितारं नृपतिं ब्राह्मणं चातपस्विनम्।

धनिकं चाप्रदातारं देवा घ्नन्ति त्यजन्त्यधः॥ 7॥

अन्वयः - देवाः अरक्षितारं नृपतिं च अतपस्विनं ब्राह्मणं च अप्रदातारं धनिकं घ्नन्ति, अधः त्यजन्ति।

शब्दार्थः - देवाः - सुराः। अरक्षितारम् - प्रजापालनमकुर्वाणम्। नृपतिम् - राजानम्। च - पुनः। अतपस्विनम् - तपोविरतम्। ब्राह्मणम् - विप्रम्। अप्रदातारम् - दानशून्यम्। धनिकम् - धनिनम्। घ्नन्ति -नाशयन्ति। अधः - नीचैः। त्यजन्ति - त्यागं कुर्वन्ति।

न हीदृशं संयमनं त्रिषु लोकेषु विद्यते।

दया मैत्री च भूतेषु दानञ्च मधुरा च वाक्॥ 8॥

अन्वय: - त्रिषु लोकेषु ईदृशं संयमनं नहि विद्यते यथा भूतेषु दया मैत्री दानं तथा मधुरा वाक् भवतीति शेष: ।

शब्दार्थ: - त्रिषु - त्रिसंख्यकेषु । लोकेषु - भुवनेषु । ईदृशम् - एतादृशम् । संयमनम् - वशीकरणम् । न हि - नैव । विद्यते - अस्ति । यथा - येन प्रकारेण । भूतेषु - जीवेषु । दया - हितेच्छा वानुकम्पा । मैत्री - सख्यम् । मधुरा - मनोहरा । वाक् - वाणी च भवतीति शेष: ।

नोपेक्षेतस्त्रियं बालं रोगं दासं पशुं धनम् ।
विद्याभ्यासं क्षणमपि सत्सेवां बुद्धिमान् नर: ॥ 9 ॥

अन्वय: - बुद्धिमान् नर: स्त्रियं बालं रोगं दासं पशुं धनं विद्याभ्यासं सत्सेवां क्षणमपि न उपेक्षेत ।

शब्दार्थ: - बुद्धिमान् - ज्ञानी । नर: - जन: । स्त्रियम् - नारीम् । बालम् - शिशुम् । रोगम् - रुजम् । दासम् - भृत्यम् । पशुम् - चतुष्पदम् । धनम् - वित्तम् । विद्याभ्यासम् - विद्याध्ययनम् । तत्सेवाम् - सज्जनाराधनम् । क्षणमपि - मुहूर्तमपि । न - नहि । उपेक्षेत - अवधीरयेत् ।

विद्याधनं श्रेष्ठतरं तन्मूलमितरद्धनम् ।
दानेन वर्द्धते नित्यं न भाराय न नीयते ॥ 10 ॥

अन्वय: - विद्याधनं श्रेष्ठतरम्, इतरद्धनं तन्मूलम् । एतच्च दानेन नित्यं वर्द्धते, न भाराय न नीयते ।

शब्दार्थ: - विद्याधनं - विद्यारूपं सम्पदम् । श्रेष्ठतरम् - सकल-धनेभ्यो वरेण्यम् । इतरत् - अन्यत् । धनम् - वित्तम् । तन्मूलम्- विद्यामूलम् । एतच्च, दानेन - वितरणेन । नित्यम् - सततम् । वर्द्धते - वृद्धिं याति । भाराय - दुर्वहणाय । न - नहि, भवति । न च अन्यै: नीयते - अपह्रियते ।

## अभ्यास:

1. प्रश्नानाम् एकपदेन उत्तरं दियताम् -

   क. दैवम् के उपासते ?

   ख. वन्द्यचरिता: महत् कम् मन्यन्ते ?

   ग. सत्क्रियया किम् भवति ?

   घ. वेणु: कथम् नष्ट: अभूत् ?

   ङ. नयस्य मूलम् किम् ?

   च. श्रेष्ठतरं धनम् किम् ?

2. एकवाक्येन प्रश्नानाम् उत्तरं दीयताम्-

क. जनः जितेन्द्रियः कथम् भवति ?

ख. पार्थिवः अर्थाय कथं यतेत ?

ग. शास्त्रतः सदसज्ज्ञात्वा किम् समाचरेत् ?

घ. कः शास्त्रम् ऋच्छति ?

ङ. विद्याधनम् केन नित्यं वर्द्धते ?

3. अधोलिखितप्रश्नानाम् उत्तराणि ददातु-

क. देवाः कान् घ्नन्ति ?

ख. त्रिषु लोकेषु कीदृशं संयमनं न विद्यते ?

ग. बुद्धिमान् नरः किम्-किम् न उपेक्षेत ?

घ. विद्याधनं कथं श्रेष्ठतरं वर्तते ?

4. रिक्तस्थानां पूर्तिं कुरुत-

क. सहायास्तादृशा एव यादृशी........................।

ख. विषयाभिलोभेन ...................... प्रेरयतीन्द्रियम्।

ग. न हीदृशं .................... त्रिषु लोकेषु विद्यते।

घ. विद्याभ्यासं ................... सत्सेवां बुद्धिमान् नरः।

ङ. दानेन ....................... नित्यं वर्द्धते।

5. अधोलिखताः पङ्क्तीः मेलयत-

| | | | |
|---|---|---|---|
| क. | विषयामिषलोभेन | क. | पृथुर्वृद्धस्तु धर्मतः। |
| ख. | नयस्य विनयो मूलम् | ख. | क्लीबा दैवमुपासते। |
| ग. | वेणुः नष्टस्त्वधर्मेण | ग. | यादृक् कर्मफलोदयः। |
| घ. | अशक्ताः पौरुषं कर्त्तुं | घ. | विनयः शास्त्रनिश्चयात्। |
| ङ. | बुद्धिरुत्पद्यते तादृक् | ङ. | मनः प्रेरयतीन्द्रियम्। |

6. शुद्धवाक्यानां समक्षं 'आम' अशुद्धवाक्यानां समक्षं 'न' लिखत-

क. यादृशी भवतव्यता भवति तादृशाः सहायाः भवन्ति।

ख. वन्द्यचरिताः धीमन्तः महत् दैवम् मन्यन्ते।

ग. मनः विषयामिषलोभेन इन्द्रियम् प्रेरयति।

घ. विद्याधनं दानेन क्षयं प्राप्नोति।

7. सन्धि-विग्रहपूर्वकम् सन्धेः नामानि लिखत-

| | | विग्रहः | नाम |
|---|---|---|---|
| क. | बुद्धिरुत्पद्यते | ................ | ............... |
| ख. | अशक्ताः | ................ | ............... |
| ग. | प्रेरयतीन्द्रियम् | ................ | ............... |
| घ. | विद्याभ्यासम् | ................ | ............... |
| ङ. | कर्मफलोदयः | ................ | ............... |

8. समास-विग्रहं कुरुत-

क. जितेन्द्रियः

ख. कर्मफलम्

ग. वन्द्यचरिताः

घ. विषयामिषं

ङ. सत्सेवा

9. प्रकृति-प्रत्ययम् पृथक् कुरुत-

| | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| क. | पुरुस्कृत्य | ................ | ............... |
| ख. | बुद्धिमान् | ................ | ............... |
| ग. | ज्ञात्वा | ................ | ............... |
| घ. | कर्तुम् | ................ | ............... |

10. अधोलिखितशब्दानां विलोमशब्दं लिखत-

क. पौरुषम् ..............................

ख. धनिक: ..............................

ग. इष्टम् ..............................

घ. मधुरम् ..............................

11. शब्दानां मूलशब्दं विभक्तिं च प्रदर्श्य तालिकां पूरयत-

| | | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|---|
| क. | धीमन्त: | ........... | ........... | .......... |
| ख. | वेणो: | ........... | ........... | .......... |
| ग. | धर्मेण | ........... | ........... | .......... |
| घ. | निश्चयात् | ........... | ........... | .......... |
| ङ. | तस्मिन् | ........... | ........... | .......... |
| च. | लोकेषु | ........... | ........... | .......... |

योग्यताविस्तार:-

- अन्यनीतिश्लोका: संस्कृतग्रन्थेभ्य: चित्वा कण्ठस्थीकरणीया: ।

❖ ❖ ❖

## अष्टादशः पाठः

# अभिमन्योः उत्सर्गः

संस्कृतस्य नाट्यपरम्परा अतिसमृद्धा। संस्कृतस्य नाटकानि अपि विश्व प्रसिद्धानि। भिन्नरुचेः जनस्य नाट्यम् एकं समाराधनम् भवति इति कालिदासेन उक्तम्। नाट्यविधौ संवादयोजनया अन्यैः तत्त्वैरपि मनोरञ्जकशैल्या भावोपदेशो भवति। अत्र सार्वभौम संस्कृतप्रचारकेन्द्रात् प्रकाशितस्य बालनाटकसङ्ग्रहात् अभिमन्योः प्रमाणम् इति नाम्ना प्रकाशितं लघुनाटकं स्वीकृतम्। तस्मिन्नपि अभिमन्योः शौर्यं, बलिदानञ्च योजयित्वा अभिमन्योः उत्सर्गः इति नाम्ना अत्र प्रस्तुतम्। अस्मिन् लघुनाटके समागताः श्लोकाः महाभारतस्य अभिमन्युवधप्रसङ्गात् सञ्चिताः। अभिमन्योरदम्यशौर्यस्य पराक्रमस्य चान्ते बलिदानस्य भावाः अत्र प्रस्तुताः वर्तन्ते।

(शिविरे युधिष्ठिरो भीमसेनश्च अभिमन्युना सह मन्त्रयतः)

युधिष्ठिरः - (अभिमन्युं प्रति) वत्स ! श्रुतं मया अद्य भगवता द्रोणाचार्येण आश्चर्यमयी अभेद्या व्यूहरचना कृता वर्तते। न च वयं चक्रव्यूहस्य भेदनरहस्यं जानीमः।

त्वं वाऽर्जुनो वा कृष्णो वा भिन्द्यात् प्रद्युम्न एव वा।
चक्रव्यूहं महाबाहो पञ्चमो नोपपद्यते ॥

अतस्त्वं क्षिप्रमेव व्यूहभेदनं विधाय आत्मनः सेनायाः समुद्धारं कुरु। अन्यथा अर्जुनः आगत्य अस्माकं महतीं गर्हणां करिष्यति।

अभिमन्युः - महाराज ! अलमत्र चिन्तया।

द्रोणस्य दृढमत्युग्रम् अनीकप्रवरं युधि।
पितृणां जयमाकाङ्क्षन् अवगाहेऽविलम्बितम् ॥

परन्तु पित्रा केवलं व्यूहे प्रवेश एव उपदिष्टो न तु विनिर्गमः। अतो यदि सङ्कटकालः समागच्छेत् तदा मया किं कर्त्तव्यम् ?

युधिष्ठिरः - अभिमन्यो ! न तस्य चिन्ता कर्त्तव्या।

भिन्ध्यनीकं युधां श्रेष्ठ द्वारं सञ्जनयस्व नः।
वयं त्वानुगमिष्यामो येन त्वं तात यास्यसि ॥

भीमसेनः - वत्स ! न वयं त्वाम् एकाकिनं परित्यजामः।

अहं त्वाऽनुगमिष्यामि धृष्टद्युम्नोऽथ सात्यकिः।
पाञ्चालाः केकया मत्स्यास्तथा सर्वे प्रभद्रकाः॥
सकृद् भिन्नं त्वया व्यूहं तत्र तत्र पुनः पुनः।
वयं प्रध्वंसयिष्यामो निध्नमाना वरान् वरान्॥

अभिमन्युः - महामान्याः ! यद्येवं तर्हि सत्वरमेव अहं चक्रव्यूहे प्रवेशाय प्रस्थानं करोमि।

अहमेतत् प्रवेक्ष्यामि द्रोणानीकं दुरासदम्।
पतङ्ग इव सङ्क्रुद्धो ज्वलन्तं जातवेदसम्॥
तत्कर्माद्य करिष्यामि हितं यद् वंशयोर्द्वयोः।
मातुलस्य च यत् प्रीतिः करिष्यति पितुश्च मे॥
शिशुनैकेन सङ्ग्रामे काल्यमानानि संघशः।
द्रक्ष्यन्ति सर्वभूतानि द्विषत्सैन्यानि वै मया॥
नाहं पार्थेन जातः स्यां न च जातः सुभद्रया।
यदि मे संयुगे कश्चित् जीवितो नाद्य मुच्यते॥
यदि चैकरथेनाहं समग्रं क्षत्रमण्डलम्।
न करोम्यष्टधा युद्धे न भवाम्यर्जुनात्मजः॥

सारथे ! रथं सज्जीकुरु। (युधिष्ठिरं भीमसेनं च प्रणमति)

युधिष्ठिरः - एवन्ते भाषमाणस्य बलं सौभद्र ! वर्धताम्।
यत् समुत्सहसे भेत्तुं द्रोणानीकं दुरासद्म्॥

(सारथिना सह विनिष्क्रान्तः)

युधिष्ठिरः - भीमसेन ! इदानीं कथञ्चित् समाश्वसितं मे हृदयम्। परं वीरोऽपि, बालकः खलु अभिमन्युः। अतस्तस्य रक्षाकार्ये सर्वथा सावधानैर्भवितव्यमस्माभिः।

भीमसेनः - अत्र कः सन्देहः ? तत् चलितव्यमेव यथाशीघ्रं महाराजेन।

(उभौ विनिष्क्रान्तौ)

द्वितीयं दृश्यम्

अभिमन्युः - सारथे ! महानेषः कलकलः श्रूयते संग्रामभूमौ। तत् अविलम्बितमेव रथं सज्जीकुरु।

सारथिः - परं युवराज ! निपुणं विचार्य युद्धस्थले अवतरणीयमार्येण ।

अभिमन्युः - कुतस्ते ईदृशो विकल्पः ?

सारथिः - अतिभारोऽयमायुष्मन् आहितस्त्वयि पाण्डवैः ।
संप्रधार्य क्षणं बुद्धया ततस्त्वं योद्धुमर्हसि ॥
आचार्यो हि कृती द्रोणः परमास्त्रे कृतश्रमः ।
अत्यन्त-सुख संवृद्धस्त्वं चाऽयुद्ध-विशारदः ॥

अभिमन्युः - (विहस्य) अहो, मद्विषयेऽपि ईदृशो व्यामोहस्ते !।
सारथे ! कोन्वयं द्रोणः समग्रं क्षत्रमेव वा ।
ऐरावतगतं शक्रं सहामरगणैरहम् ॥
अथवा रुद्रमीशानं सर्वसूतगणाचितम् ।
योधयेयं रणमुखे न मे क्षत्रेऽद्य विस्मयः ॥
न ममैतद् द्विषत्सैन्यं कलामर्हति षोडशीम् ।
अपि विश्वजितं विष्णुं मातुलं प्राप्य सूतज ॥
पितरं चार्जुनं युद्धे न भीर्गामुपयास्यति ।

तत् निर्भयो भूत्वा रथं रणक्षेत्रं प्रापय ।

(उभौ विनिष्क्रान्तौ)

तृतीयं दृश्यम्

युद्धवेशे प्रविशति कुमारोऽभिमन्युः । षड्महारथिभिः कर्ण-दुर्योधन-दुःशासन-जयद्रथ-कृपाचार्य-अश्वत्थामाप्रभृतिभिः सह तस्य तुमुलं युद्धं भवति ।

कर्णः - (युद्धरतं अभिमन्युं वीक्ष्य) अहो ! अयमभिमन्युः बालः, परन्तु केसरिण इव निःशङ्कचेतसा युद्धं करोति । शस्त्राणि प्रहरति । अस्मान् पीडयति च ।

कृपः - अरे ! एतेन वीरबालकेन अद्य महदात्मपौरुषं प्रकटितम् । अद्भुतोऽयं पराक्रमः ।

द्रोणः - युद्धभूमौ अस्य समं अन्यं धनुर्धरं नाहं मन्ये । सुभ्रदाकुमारोऽयं सर्वानतिशेते ।

दुर्योधनः - (कर्णंप्रति) कर्ण ! अयमेकाकी एव खलु दुर्जेयः । नैकेनास्य संहारोसंभवः । अतः सवैर्मिलित्वैव तद्वधाय चेष्टितव्यम् ।

(अनन्तरं सर्वेमिलित्वा तस्मिन् प्रहरन्ति । अभिमन्युः निःशस्त्रोभवति । रथोऽपि भग्नः भवति । सः रथस्यैकचक्रेणैव युद्धं करोति । युगपच्छराघातेन भूमौ पतितः प्राणान् त्यजति ।)

नेपथ्ये श्रूयते    द्रोणकर्णमुखैः षड्भिर्धार्तराष्ट्रैर्महारथैः।

एकोऽयं निहतः शेते नैष धर्मो मतोहि नः॥

विचेता न्यपतद्भूमौ सौभद्रः परवीरहा।

एवं विनिहतो राजन्नेको बहुभिराहवे॥

अभिमन्योरुत्सर्गः शौर्यस्य, पराक्रमस्य, बलिदानस्य चोदात्तमुदाहरणम्।

## शब्दार्थः

मन्त्रयतः - मन्त्रणां कुरुतः। अभेद्या - भेदनाक्षमा। नोपपद्यते - नोचितं भवति। गर्हणां - निन्दां। अत्युग्रं - अत्युत्कटम्। अनीकप्रवरं - सैन्यचतुरम्। आकांक्षन् - इच्छन् अवगाहे - अवगाहने। निमञ्जने। अबलम्बितम् - आश्रितम् विनिर्गम - बहिरागमनम्। अनीकम् - सेनाम्। सञ्जनयस्व - मार्ग कुरुष्व। अनुगमिष्यामः - अनुगमनं करिष्यामः। प्रध्वंसयिष्यामः - नाशयिष्यामः। निघ्नमाना - हन्तुकामाः। द्रोणानीकम् - द्रोणसैन्यम्। दुरासदम् - अभेद्यम्। पतङ्गः - कीटः। ज्वलन्तं - दहन्तं। जातवेदसम् - अग्निम्। सङ्घशः - समूहशः। द्विषत्सैन्यानि - शत्रुसैन्यानि। वै - निश्चयेन। संयुगे - युद्धक्रियमाणे समये। क्षत्रमण्डलं - क्षत्रियमण्डलम्। वर्धताम् - एधताम्। समुत्सहसे - उत्साहसम्पन्नोऽसि। अतिभारः - महद्भारः। आहितः - स्थापितः प्रदत्तः वा। सम्प्रधार्य - कर्त्तव्यं निश्चित्य। कृती - शास्त्रज्ञः। परमास्त्रे - उत्तमशस्त्रप्रयोगे। सुखसंवृद्धः - सुखेनपालितः इति। क्षत्तं - क्षत्रियसमूहं। ऐरावतगतं - ऐरावतस्थितं शक्रम्- इन्द्रम्। अमरगणैः - देवसमूहैः। गणार्चितम् - चरसेवितम्। भीः - भयम्। उपयास्यति - समीपम् आगमिष्यति। विश्वजितम् - संसारविजियम्। विचेता - चेतनारहितः। न्यपतद् - अपतत्। सौभद्रः - अभिमन्युः। परवीरहा - शत्रुनाशकः। एकः - एकाकी। बहुभिः - अनेकैः। आहवे - युद्धस्थले विनिहतः विनिपातितः, हतः।

## अभ्यासः

1. प्रश्नानाम् एकपदेन उत्तरं ददातु -

   क. केन अभेद्या व्यूहरचना कृता ?

   ख. भीमसेनः कम् एकाकिनं न परित्यजति ?

   ग. सङ्ग्रामभूमौ कः ध्वनिः श्रूयते ?

   घ. केसरिणः इव कः युद्धं करोति ?

   ङ. अभिमन्योः माता का आसीत् ?

2. प्रश्नानाम् एकवाक्येन उत्तरं ददातु -

क. द्रोणाचार्येण कीदृशी व्यूहरचना कृता ?

ख. दुर्योधन: अभिमन्युम् प्रति किं कथयति ?

ग. युधिष्ठिरादय: कस्य भेदनरहस्यं न ज्ञातवन्त: ?

घ. अभिमन्यु: कुत्र प्रविष्टुम् अग्रसर: अभवत् ?

ङ. सङ्ग्रामभूमौ को ध्वनि: श्रूयते ?

3. प्रश्नानाम् उतरं ददातु -

क. अभिमन्यु: द्रोणानीके कथं प्रवेक्ष्यति ?

ख. भीमसेनं प्रति युधिष्ठर: किम् कथयति ?

ग. अभिमन्यो: कै: सह तुमुलम् युद्धम् अभवत् ?

घ. कर्ण: अभिमन्युं वीक्ष्य किम् कथयति ?

ङ. प्रेक्षकान् प्रति कवे: का भावना प्रदर्शिता ?

4. कोष्ठकात् शब्दं चित्वा रिक्तस्थानानि पूरयत-

(न तु विनिर्गम:, अभिमन्यु:, रथं, पराक्रम:, भूमिपाला:, प्रवेक्ष्यामि, व्यूहरचना)

क. अभेद्या ................... कृता।

ख. व्यूहे प्रवेश एव उपदिष्टो ......................।

ग. अहमेतत् .................. द्रोणानीकं दुरासदम्।

घ. तत् अविलम्बितमेव ......................... सज्जीकुरु।

ङ. अद्‌भुतोऽयम् ........................।

च. सर्वे बाणैरङ्किता .....................।

5. ''अ'' ''ब'' खण्डयो: वाक्यमेलनम् कुरुत-

| | (अ) | (ब) |
|---|---|---|
| क. | चक्रव्यूहं महाबाहो | भेदनरहस्यं जानीम:। |
| ख. | पतङ्ग इव संक्रुद्धो | अवतरणीयमार्येण। |
| ग. | निपुणं विचार्य युद्धस्थले | पञ्चमो नोपपद्यते। |
| घ. | तत् निर्भयो भूत्वा रथं | ज्वलन्तं जातवेदसम्। |

| | | |
|---|---|---|
| ङ. | न च वयं चक्रव्यूहस्य | रणक्षेत्रं प्रापय। |
| च. | शस्त्राणि प्रहरन्ति | तस्मिन् प्रहरन्ति। |
| छ. | सर्वे मिलित्वा | अस्मान् पीडयति च। |

6. निम्नलिखिता: पङ्क्ती क: कम् प्रति कथयति।

| | पङ्क्ति: | क: | कं प्रति |
|---|---|---|---|
| क. | न च वयं चक्रव्यूहस्य भेदनरहस्यं जानीम: | ......... | ........... |
| ख. | अलम् अत्र चिन्तया | ......... | ........... |
| ग. | तत् अविलम्बितमेव रथं सज्जीकुरु | ......... | ........... |
| घ. | अद्भुतोऽयं पराक्रम: | ......... | ........... |
| ङ. | मद्विषयेऽपि ईदृशो व्यामोहस्ते | ......... | ........... |
| च. | न वयं त्वम् एकाकिनं परित्यजाम: | ......... | ........... |
| छ. | अयमेकाकी एव खलु दुर्जेय: | ......... | ........... |

7. शुद्धं/अशुद्धं वाक्यं पाठं पठित्वा चिनुत -

| | | |
|---|---|---|
| क. | यदि सङ्कटकाल: समागच्छेत् तदा मया किं कर्त्तव्यम्। | (          ) |
| ख. | न च वयं चक्रव्यूहस्य प्रवेशरहस्यं जानीम:। | (          ) |
| ग. | सारथे ! रथं न सज्जीकुरु। | (          ) |
| घ. | यदि मे संयुगे कश्चिद् जीवितो नाद्य मुच्यते। | (          ) |
| ङ. | गीतं श्रूयते सङ्ग्रामभूमौ। | (          ) |
| च. | तव विषयेऽपि ईदृशो व्यामोहस्ते। | (          ) |
| छ. | वयं त्वानुगमिष्यामो येन त्वं तात यास्यसि। | (          ) |
| ज. | एकेनास्य संहारोऽसंभव:। | |

8. सन्धिविच्छेदं कुरुत नाम च लिखत-

| | | सन्धिविच्छेद: | सन्धे: नाम |
|---|---|---|---|
| क. | अतस्त्वं | .................. | .................. |
| ख. | दृढमत्युग्रम् | .................. | .................. |
| ग. | भिन्ध्यनीकं | .................. | .................. |

| | | | |
|---|---|---|---|
| घ. | कश्चिद् | .................. | .................. |
| ङ. | भवाम्यर्जुनात्मजः | .................. | .................. |
| च. | यद्येवं | .................. | .................. |

9. समासविग्रहं कुरुत-

क. व्यूहरचना

ख. सङ्ग्रामभूमौ

ग. अर्जुनात्मजः

घ. युद्धस्थले

ङ. सप्तमहारथिभिः

योग्यताविस्तारः-

- क्रीडायाः व्यूहरचनानिर्माणं मित्रगणैः सह करणीयम्।
- 'रामायणम्' इति ग्रन्थस्य स्वभाषायां एकाङ्कीं निर्मीय संस्कृतशिक्षकेन सह संस्कृतभाषायां अनुवादः कर्त्तव्यः।

❖ ❖ ❖

## नवदशः पाठः

# सुभाषितानि

सुभाषितशब्दस्य अर्थः सुष्ठु भाषितः उक्तः कथितः वा भवति। सुभाषितेषु जीवनस्य रहस्यानि, नीतिः, धर्मः, त्यागः, परोपकारः, राष्ट्रियभावः, शिक्षा, संस्कृतिः, इत्यादयः अनेके विषयाः भवन्ति। एतेषु व्यक्तो भावः उपयोगी सार्थकश्च भवति। संस्कृतवाङ्मये कोटिशः श्लोकाः, गेयानि पद्यानि सङ्कलितानि दृश्यन्ते। नानाभावयुक्ताः, नानाविचारसम्पन्नाः श्लोकाः सुभाषितेषु परिगणिताः। अस्मिन् पाठे भावपूर्णानि सुभाषितानि प्रस्तुतानि सन्ति।

येषां त्रीण्यवदातानि विद्या योनिश्च कर्म च।
तान् सेवेत समास्या हि, शास्त्रेभ्योऽपि गरीयसी ॥ 1 ॥

अन्वयः - येषां विद्या योनिः कर्म च त्रीणि अवदातानि (सन्ति), तान् सेवेत। हि समास्या शास्त्रेभ्यः अपि गरीयसी (भवति)।

शब्दार्थः - येषाम् - जनानाम्। विद्या - ज्ञानम्। योनिः - कुलम्। कर्म च - कार्यञ्च। त्रीणि - त्रिसंख्याकानि। अवदातानि - निर्मलानि, सन्ति। तान् - ज्ञानकुलकर्म निर्मलान्तः करणान् जनान्। सेवे - भजे। हि - यतः, तैः - तादृशैः सद्पुरुषैः। समास्या - सहोपवेशनम्। शास्त्रेभ्यः अपि - वेदादिशास्त्रस्वाध्यायेभ्यः अपि। गरीयसी - श्रेयस्करी भवतीति भावः।

असतां दर्शनात् स्पर्शात् सञ्जल्पाच्च सहासनात्।
धर्माचाराः प्रहीयन्ते सिद्धयन्ति च न मानवाः ॥ 2 ॥

अन्वयः - असतां दर्शनात् स्पर्शात् सञ्जल्पात् सहासनात् च धर्माचाराः प्रहीयन्ते, मानवाः च न सिद्धयन्ति।

शब्दार्थः - असतां - असज्जनानाम्। दर्शनात् - अवलोकनात्। स्पर्शात् - स्पर्शमात्रकरणात्। सञ्जल्पात् - सहवार्ताकरणात्। सहासनात् - सहोपवेशनात्। धर्मचाराः - सद्कर्माणि। प्रहीयन्ते - विनश्यन्ति। मानवाः च - जनाश्च। न - नहि। सिद्धयन्ति - सफलतां प्राप्नुवन्ति (कुत्रचिदपि)।

शुष्कोऽपि चन्दनतरुर्न जहाति गन्धं,
वृद्धोऽपि वारणपतिर्न जहाति लीलाम्।
यन्त्रार्दितोऽपि च रसं न जहाति चेक्षुः,
क्षीणोऽपि न त्यजति शीलगुणं सुशीलः ॥ 3 ॥

अन्वय: - चन्दनतरु: शुष्कोऽपि गन्धं न जहाति, वारणपति: वृद्धोऽपि लीलां न जहाति, इक्षु: यन्त्रार्दितोऽपि रसं न जहाति, (एवं) सुशील: क्षीणोऽपि शीलगुणं न त्यजति।

शब्दार्थ: - जहाति - परित्यजति। वारणपति: - गजश्रेष्ठ:। लीलाम् - क्रीडाम्। इक्षु:, यन्त्रार्दितोऽपि - यन्त्रेण मर्दितोऽपि। रसम् - माधुर्यम्। क्षीणोऽपि - रहितोऽपि।

मरणं प्रकृति: शरीरिणां विकृतिर्जीवनमुच्यते बुधै:।
क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ ॥ 4 ॥

अन्वय: - बुधै: शरीरिणां प्रकृति: मरणम्, विकृति: जीवनम् उच्यते। जन्तु: यदि श्वसन् क्षणम् अपि अवतिष्ठते, ननु असौ लाभवान्।

शब्दार्थ: - बुधै: - विद्वद्भि:। शरीरिणां - देहिनाम् प्रकृति: - स्वभाव:। मरणम् - मृत्यु:। विकृति: - विकार:। जीवनम् - प्राणधारणम् इति। उच्यते - कथ्यते। जन्तु: - मानव:। यदि श्वसन् - प्राणं धारयन्। क्षणम् अपि - क्षणमात्रमपि। अवतिष्ठते - जीवति। ननु - निश्चयेन। असौ - एष:। लाभवान् - लाभयुक्त:। अर्थात् यावत्कालं जीवनं प्राप्येत तावदेव सन्तोषं कुर्यात्।

सहसा विदधीत न क्रियामविवेक: परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलुब्धा: स्वयमेव सम्पद: ॥ 5 ॥

अन्वय: - क्रियां सहसा न विदधीत। अविवेक: परमापदां पदम्। हि गुणलुब्धा: सम्पद: विमृश्यकारिणं स्वयम् एव वृणुते।

शब्दार्थ: - क्रियाम् - किमपि कार्यम्। सहसा - अकस्मात् शीघ्रतया वा। न - नहि। विदधीत - कुर्यात्। अविवेक: - विमर्शाभाव:। परमापदां - अतीव दु:खस्य। पदम् - स्थानम् (भवति)। हि - यत:। गुणलुब्धा: - गुणाकृष्टा:। सम्पद: - समृद्धि: लक्ष्मी वा। विमृश्यकारिणम् - विवेकशीलं जनम्। स्वयम् एव - आत्मनम् एव। वृणुते - वरणं करोति। विवेकवन्तं प्रति गच्छतीति भाव:।

लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ 6 ॥

अन्वय: - लौकिकानां साधूनां वाक् अर्थम् अनुवर्तते हि। पुन: आद्यानां ऋषीणां वाचम् अर्थ: अनुधावति।

शब्दार्थ: - लौकिकानाम् - साधारणानाम्। साधूनाम् - सज्जनानाम्। वाक् - वाणी। अर्थम् - वस्तु अनुवर्तते - अनुसरति। हि- निश्चयेन। पुन: - परन्तु। आद्यानाम् - प्रधानानाम्। ऋषीणाम् - महामुनीनाम् वशिष्ठादीनामित्यर्थ:। वाचम् - वाणीम्। अर्थ: - वस्तु। अनुधावति - अनुसरति। साधूनां वाणी वस्त्वपेक्षिणी, वशिष्ठप्रमुखानामृषीणां तु वाण्यपेक्षं वस्तु वर्तते।

सर्पा: पिबन्ति पवनं न च दुर्बलास्ते,

शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति।

कन्दैः फलैर्मुनिवरा गमयन्ति कालं

सन्तोष एव पुरुषस्य परं निधानम्॥ 7॥

अन्वय: - सर्पा: पवनं पिबन्ति च ते दुर्बला: न वनगजा: शुष्कै: तृणै: बलिनो भवन्ति, मुनिवरा: कन्दै: फलै: कालं गमयन्ति, पुरुषस्य सन्तोष एव परं निधानम्।

शब्दार्थ: - वनगजा: - वन्यकरिण:। कालम् - समयम्। गमयन्ति - क्षपयन्ति। परम् - श्रेष्ठम्। निधानम् - निधि:।

दानेन श्लाघ्यतां यान्ति पशुपाषाणपादपा:।

दानमेव गुण: श्लाघ्य: किमन्यैर्गुणकोटिभि:॥ 8॥

अन्वय: - पशुपाषाणपादपा: (अपि) दानेन श्लाघ्यतां यान्ति। दानं गुण: एव श्लाघ्य:, अन्यै: गुणकोटिभि: किम्।

शब्दार्थ: - पशुपाषाणपादपा: - कीटपतङ्ग प्रस्तरतरवोऽपि। दानेन - दानास्य गुणेन श्लाघ्यतां - प्रशंसापात्रताम्। यान्ति - प्राप्नुवन्ति। दानम् - परोपकाराय सर्वस्वत्यागम्। गुण: - सद्भाव: एव। श्लाघ्य: - प्रशस्यो भवति। अन्यै: - अपरै:। गुणकोटिभि: - कोटिपरिमितै: गुणै:। किम् - किं तात्पर्यम्। अर्थात् दयादिगुणै: दानं सर्वश्रेष्ठम् अस्ति।

सत्येन धार्यते पृथिवी सत्येन तपते रवि:।

सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्॥ 9॥

अन्वय: - पृथ्वी सत्येन धार्यते, रवि: सत्येन तपते, वायु: च सत्येन वाति। सर्वं सत्ये प्रतिष्ठितम् (अस्ति)।

शब्दार्थ: - पृथिवी - धरा। सत्येन - ऋतेन । धार्यते - धारणं क्रियते। रवि: - सूर्य:। सत्येन - ऋतेन। तपते - दहति। वायु:च- पवनश्च। सत्येन - ऋतेन। वाति - प्रवहति। सर्वम् - समग्रं वस्तुजातम्। सत्ये - ऋते। प्रतिष्ठितम् - आश्रितम्। अस्ति - वर्तते।

गुणैरुत्तुङ्गतां याति नोच्चैरासनसंस्थित:।

प्रसादशिखरस्थोऽपि काक: किं गरुडायते॥ 10॥

अन्वय: - (नर:) गुणै: उत्तुङ्गतां याति, उच्चै: आसनसंस्थित: न। प्रसादशिखरस्थ: अपि काक: गरुडायते किम्।

शब्दार्थ: - नर: - मानव:। गुणै: - दयादाक्षिण्यादिभि: गुणै:। उत्तुङ्गतां - उन्नतिम्। याति - प्राप्नोति। उच्चै: - उच्चस्थानस्थापितै:। आसनसंस्थित: - स्तरणोपविष्ट:। न - नहि। अर्थात् कोऽपि जन: उच्चपदं प्राप्यैव प्रशस्यो न भवति अपितु गुणैरेव। यथा प्रसादशिखरस्थ: - भवनोपरि अधिष्ठित:, अपि। काक: - वायस: गरुडायते किम्- गरुडस्य योग्यतां सम्मानं च प्राप्नोति किम्।